VHP 5.2

॥ श्रीः ॥

अथ श्रीकृष्णकर्णामृतम् ।

प्रथमशतकम् ।

॥ श्रीगणेशाय नमः ॥

श्रीमद्राधावल्लभोजयत्यतितराम् ॥ चिंतामणि
र्जयतिसोमगिरिर्गुरुर्मे शिक्षागुरुश्च भगवाञ्छिखि
पिच्छमौलिः ॥ यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसंलभतेजयश्रीः ॥ १ ॥ अस्तिस्व
स्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं वस्तुप्रस्तुत
वेणुनादलहरीनिर्वाणनिर्व्याकुलम् ॥ स्रस्तस्रस्त
निरुद्धनीविविगलद्गोपीसहस्रावृतंहस्तन्यस्तनताप
वर्गमखिलोदारंकिशोराकृति ॥ २ ॥ चातुर्यैकनि
धानसीमचपलापांगच्छटामंथरं लावण्यामृतवी
चिलालितदृशंलक्ष्मीकटाक्षादृतम् ॥ कालिंदीपु

लिनांगणप्रणयिनं कामावतारांकुरंबालंनीलममी-
वयंमधुरिमस्वाराज्यमाराध्नुमः ॥ ३ ॥ बर्होत्तंस
विलासिकुंतलभरं माधुर्यमग्नाननं प्रोन्मीलन्नव
यौवनंप्रविलसद्वेणुप्रणादामृतम् ॥ आपीनस्तनकु
ड्मलाभिरभितोगोपीभिराराधितं ज्योतिश्चेतसि
नश्चकास्तिजगतामेकाभिरामाद्भुतम् ॥४॥ मधुरत
रस्मितामृतविमुग्धमुखांबुरुहंमदशिखिपिच्छलां-
छितमनोज्ञकचप्रचयम् ॥ विषयविषामिषग्रसनगृ
ध्नुनिचेतसिमे विपुलविलोचनंकिमपिधामचका
स्तिचिरम् ॥ ५ ॥ मुकुलायमाननयनांबुजं
विभोर्मुरलीनिनादमकरंदनिर्भरम् ॥ मुकुरा
यमाणमृदुगंडमंडलंमुखपंकजंमनसिमेविजृंभताम्
॥ ६ ॥ कमनीयकिशोरमुग्धमूर्तेः कलवेणुक्वणि
ताहताननेंदोः ॥ ममवाचिविजृंभतांमुरारेर्मधु
रिम्णःकणिकापिकापिकापि ॥ ७ ॥ मदशि
खंडिशिखंडविभूषणंमदनमंथरमुग्धमुखांबुजम् ॥

व्रजवधूनयनांचलवंचितं विजयतां ममवाङ्मय
जीवितम् ॥ ८ ॥ पल्लवारुणपाणिपंकजसंगिवेणु
रवाकुलंफुल्लपाटलपाटलीपरिवादिपादसरोरुहम् ।
उल्लसन्मधुराधरद्युतिमंजरीसरसाननं बल्लवीकुच
कुंभकुंकुमपंकिलंप्रभुमाश्रये ॥ ९ ॥ अपांगरे
खाभिरभंगुराभिरनंगरेखारसरंजिताभिः ॥ अनु
क्षणंबल्लवसुंदरीभिरभ्यर्च्यमानंविभुमाश्रयामः ॥
॥ १० ॥ हृदयेममहृद्यविभ्रमाणांहृदयंहर्षविशा
ललोलनेत्रम् ॥ तरणंव्रजबालसुंदरीणांतरलं
किंचनधामसन्निधत्ताम् ॥ ११ ॥ निखिलभुवन
लक्ष्मीनित्यलीलास्पदाभ्यांकमलविपिनवीथीग
र्वसर्वंकषाभ्याम् ॥ प्रणमदभयदानप्रौढिगाढोद्ध
ताभ्यांकिमपिवहतुचेतःकृष्णपादांबुजाभ्याम् ॥
॥ १२ ॥ प्रणयपरिणताभ्यांप्राभवालंबनाभ्यां
प्रतिपदललिताभ्यांप्रत्यहंनूतनाभ्याम् ॥ प्रतिमुहु
रधिकाभ्यांप्रस्नुवल्लोचनाभ्यांप्रभवतुहृदयेनः प्राण

नाथःकिशोरः ॥ १३ ॥ माधुर्यवारिधिमदांधत
रंगभंगीशृंगारसंकलितशीतकिशोरवेषम् ॥ आ
मंदहासललिताननचंद्रबिंबमानन्दसंप्लवमनुप्लवतां
मनोमे ॥ १४ ॥ अव्याजमंजुलमुखांबुजमुग्धं
भावैरास्वाद्यमाननिजवेणुविनोदनादम् ॥ आ
क्रीडतामरुणपादसरोरुहाभ्यामार्द्रे मदीयहृदये
भुवनार्द्रमोजः ॥ १५ ॥ मणिनूपुरवाचालंवंदेतंच
रणंविभोः ॥ ललितानियदीयानिलक्ष्माणिव्रज
वीथिषु ॥ १६ ॥ ममचेतसिस्फुरतुबल्लवीविभोर्म
णिनूपुरप्रणयिमंजुसिंजितम् ॥ कमलावनेचरक
लिंदकन्यकाकलहंसकंठकलकूजितादृतम् ॥१७॥
कलक्कणितकंकणंकरनिरुद्धपीतांबरं श्रमप्रसृतकुं
तलंगलितबर्हभूषंविभोः ॥ पुनः प्रकृतिचापलं प्र
णयिनीभुजायंत्रितं ममस्फुरतुमानसेमदनकेलिश
य्योत्थितम् ॥ १८ ॥ तरुणारुणकरुणामयविपु
लायतनयनं कमलाकुचकलशीभरविपुलीकृतपु

लकम् ॥ मुरलीरवतरलीकृतमुनिमानसनलिनंम
मखेलतिमदचेतसिमधुराधरममृतम् ॥१९॥ आ
मुग्धमर्धनयनांबुजचुंबमानहर्षाकुलव्रजवधूमधुरा
ननेंदोः ॥ आरब्धवेणुरवमादिकिशोरमूर्त्तेराविर्भ
वंतुममचेतसिकेपिभावाः ॥२०॥ स्तोकस्तोकनि
रुध्यमानमृदुलप्रस्पंदिमंदस्मितंप्रेमोद्भेदनिरर्गल
प्रसृमरप्रव्यक्तरोमोद्गमम् ॥ श्रोतृश्रोत्रमनोहरंव्रज
वधूलीलामिथोजल्पितं मिथ्यास्वापमुपास्महेभग
वतः क्रीडानिमीलद्दृशः ॥ २१ ॥ विचित्रपत्रां
कुरशालिबालास्तनांतरंमौनिमनोंतरं वा ॥
अपास्यवृंदावनपादपास्यमुपास्यमन्यं नविलोक
यामः ॥ २२ ॥ सार्धसमृद्धैरमृतायमानैराध्माय
मानैर्मुरलीनिनादैः ॥ मूर्धाभिषिक्तंमधुराकृतीनां
बालंकदानामविलोकयिष्ये ॥ २३ ॥ शिशिरी
कुरुतेकदानुनः शिखिपिच्छाभरणः शिशुर्दृ
शोः ॥ युगलंविगलन्मधुद्रवस्मितमुद्रामृदुनामु

खेंदुना ॥ २४ ॥ कारुण्यकर्बुरकटाक्षनिरीक्षणेन
तारुण्यसंवलितशैशववैभवेन ॥ आप्लुष्णताभुवन
मद्भुतविभ्रमेणश्रीकृष्णचन्द्रशिशिरीकुरु लोचनं
मे ॥२५॥ कदावाकालिंदीकुवलयदलश्यामलत
राःकटाक्षालक्ष्यंतेकिमपिकरुणावीचिनिचिताः ॥
कदावाकन्दर्पप्रतिभटजटाचन्द्रशिशिराः किम
प्यंतस्तोषंददतिमुरलीकेलिनिनदाः ॥ २६ ॥
अधीरमालोकितमार्द्रजल्पितंगतंचगंभीरविलास
मंथरम् ॥आमंदमालिंगितमाकुलोन्मदस्मितंचते
नाथविदंतिगोपिकाः ॥२७॥ अस्तोकस्मितभरमा
यतायताक्षंनिःशेषस्तनमृदितंव्रजांगनाभिः ॥ निः
सीमस्तबकितनीलकांतिधारंदृश्यासंत्रिभुवनसुन्द
रंमहस्ते ॥२८॥ मयिप्रसादंमधुरैः कटाक्षैर्वंशीनि
नादानुचरैर्विधेहि ॥ त्वयिप्रसन्नेकिमिहापरैर्न
स्त्वय्यप्रसन्नेकिमिहापरैर्नः ॥ २९ ॥ निबद्धमुग्धां
जलिरेषयाचेनीरंध्रदैन्योन्नतमुक्तकंठम् ॥ दयांबुधे

देवभवत्कटाक्षदाक्षिण्यलेशेनसकृन्निषिंच ॥३० ॥
पिच्छावतंसरचनोचितकेशपाशेपीनस्तनीनयन
पंकजपूजनीये ॥ चंद्रारविंदविजयोद्यतवक्त्रबिंबे
चापल्यमेतिनयनंतवशैशवे नः ॥ ३१ ॥ त्वच्छै
शवंत्रिभुवनाद्भुतमित्यवैमियच्चापलंच ममवागवि
वादगम्यम् ॥ तत्किंकरोमिविरणन्मुरलीविलास
मुग्धंमुखांबुजमुदीक्षितुमीक्षणाभ्याम् ॥ ३२ ॥
पर्याचितामृतरसानि पदार्थभंगीफल्गूनिवल्गित
विशालविलोचनानि ॥ बाल्याधिकानिमदवल्ल
वभामिनीभिर्भावेलुठंतिसुदृशांतवजल्पितानि ॥
॥ ३३ ॥ पुनःप्रसन्नेनमुखेंदुतेजसा पुरोवतीर्ण
स्यकृपामहांबुधेः ॥ तदेवलीलामुरलीरवामृतंस
माधिविघ्नायकदानुमेभवेत् ॥ ३४ ॥ भावेनमु
ग्धचपलेनविलोकितेन मन्मानसेकिमपिचापल
मुद्वहंतम् ॥ लोलेनलोचनरसायनमीक्षणेनली
लाकिशोरमुपगूहितुमुत्सुकाःस्मः ॥ ३५ ॥ अधी

रबिंबाधरविभ्रमेण हर्षार्द्रवेणुस्वरसंपदाच ॥ अ
नेनकेनापिमनोहरेणहाहंतहाहंतमनोधुनोति ॥
॥ ३६ ॥ यावन्नमेनिखिलमर्मदृढाभिघातनिःसं
धिबन्धनमुदेतिनवोपतापः ॥ तावद्विभोभवतुताव
कवक्रचंद्रचन्द्रातपद्विगुणितामममचित्तधारा ३७॥
यावन्नमेनरदशादशमीदृशोपि रंध्रादुदेतितिमिरी
कृतसर्वभावा ॥ लावण्यकेलिभवनं तवतावदेतुल
क्ष्म्यासमुत्कणितवेणुमुखेंदुबिम्बम् ॥ ३८ ॥ आ
लोललोचनविलोकितकेलिधारानीराजिताग्रसर
णेःकरुणांबुराशेः ॥ आर्द्राणिवेणुनिनदैःप्रतिना
दपूरैराकर्णयामिमणिनूपुरशिंजितानि ॥ ३९ ॥
हेदेवहेदयितहेभुवनैकबंधो हेकृष्णहेचपलहेकरुणै
कसिंधो ॥ हेनाथहेरमणहेनयनाभिरामहाहाकदा
नुभवितासिपदंदृशोमे ॥ ४० ॥ अमून्यधन्यानि
दिनांतराणिहरेत्वदालोकनमंतरेण ॥ अनाथ
बंधोकरुणैकसिंधोहाहंतहाहंतकथंनयामि ॥४१॥

किमिह शृणुमः कस्य ब्रूमः कथं कृतमाशया कथयत
कथं धन्यामन्यामहे हृदये शयम् ॥ मधुरमधुरस्मे
राकारे मनो नयनोत्सवे कृपणकृपणा कृष्णे तृष्णा चि
रं बत लंबते ॥ ४२ ॥ आभ्यां विलोचनाभ्यामंबुज
दललितलोचनं बालम् ॥ द्वाभ्यामपि परिरब्धुं दू
रे मम हंत दैवसामग्री ॥४३॥ अश्रांतस्मितमरुणारु
णाधरोष्ठं हर्षार्द्रं द्विगुणमनोज्ञवेणुगीतम् ॥ विभ्राम्य
द्विपुलविलोचनार्द्धमुग्धं वीक्षिष्ये तव वदनांबुजं क
दानु ॥ ४४ ॥ लीलायताभ्यां रसशीतलाभ्यां ली
लारुणाभ्यां नयनांबुजाभ्याम् ॥ आलोकयेदद्भुत
विभ्रमाभ्यां काले कदा कारुणिकः किशोरः ॥४५॥
बहुलचिकुरभारे बद्धपिच्छावतंसं चपलचपलनेत्रं
चारुबिंबाधरोष्ठम् ॥ मधुरमृदुलहासं मंदरोदारली
लं मृगयति नयनं मे मुग्धवेषं मुरारेः ॥ ४६ ॥ बहुल
जलदच्छायाचोरं विलासभरालसं मदशिखिशिखा
लीलोत्तंसं मनोज्ञमुखांबुजम् ॥ कमपि कमलापांगो

दग्धप्रसन्नजगज्जडंमधुरिमपरीपाकोद्रेकंवयं मृगया
महे ॥ ४७॥ परामृश्यंदूरेपरिषदिमुनीनांव्रजवधूदृ
शांदृश्यंशश्वत्रिभुवनमनोहारिवपुषम् ॥ अनामृ
श्यंवाचामनिदमुदयानामपिकदा दरीदृश्येदेवंदरद
लितनीलोत्पलनिभम् ॥ ४८ ॥ लीलायुतांबुजम
धीरमुदीक्षमाणंनर्माणिवेणुविवरेषुनिवेशयंतम् ॥
दोलायमाननयनंनयनाभिरामं देवंकदानुदयितंव्य
तिलोकयिष्ये ॥ ४९ ॥ लग्नंमुहुर्मनसिलंपटसंप्र
दायंलेखावलेखिनिरसज्ञमनोज्ञवेषम् ॥ लज्जन्मृदु
स्मितमधुस्नपिताधरांशुराकेंदुलालितमुखेंदुमुकुंद
बाल्यम् ॥ ५० ॥ अहिमकरकरनिकरमृदुमृदित
लक्ष्मीसरसतरसरसिरुहसदृशदृशिदेवे ॥ व्रजयुव
तिकलहविजयनिजलीलामदमुदितवदनशशिम
धुरिमणि लीये ॥ ५१ ॥ करकमलदलदलिततर
वंशीकलनिनदगलदमृतघनसरसिदेवे ॥ सहजरस
भरभरितदरहसितवीथीसततवहदधरमणिमधुरि

मणिलीये ॥ ५२ ॥ कुसुमशरशरसमरकुपितगो
पीकुचकलशघुसृणरसलसदुरसि देवे ॥ मृदुललि
तमृदुहसितमुषितशशिशोभामुहुरधिकमुखकमल
मधुरिमणिलीये ॥ ५३ ॥ आनम्रामसितभ्रुवो
रुपचितामक्षीणपक्ष्मांकुरेष्वालोलामनुरागिणोर्न
नयनयोरार्द्रांमृदौजल्पिते ॥ आताम्रामधरामृतेम
दकलामम्लानवंशीस्वनेष्वाशास्तेममलोचनंव्रज
शिशोर्मूर्तिंजगन्मोहिनीम् ॥ ५४ ॥ तत्कैशोरंत
च्चवक्त्रारविंदंतत्कारुण्यंतेचलीलाकटाक्षाः॥ तत्सौं
दर्यंसाचमन्दस्मितश्रीः सत्यंसत्यंदुर्लभंदैवतेषु
॥५५॥ विश्वोपप्लुवशमनैकबद्धदीक्षं विश्वासस्त
बकितचेतसांजनानाम् ॥ पश्यामः प्रतिनवकांत
कंदलार्द्रंपश्यामः पथिपथिशैशवंमुरारेः ॥ ५६ ॥
पादौपादविनिर्जितांबुजवनौपद्मालयालंकृतौपाणी
वेणुविनोदनप्रणयिनौपर्याप्तशिल्पश्रियौ ॥ बाहू
दोहदभाजनंमृगदृशांमाधुर्यधारागिरो वक्त्रंवागविष

यातिलंघितमहोबालंकिमेतन्महः ॥ ५७ ॥ बर्हं नामविभूषणंबहुमतंवेषायशेषैरलं वक्त्रंद्वित्रविशेष कांतिलहरीविन्यासधन्याधरम् ॥ शीलैरल्प धियामगम्यविभवैः शृंगारभंगीमयंचित्रं चित्र महोविचित्रमहहोचित्रंविचित्रंमहः ॥ ५८ ॥ अग्रे समग्रयतिकामपिकेलिलक्ष्मीमन्यासु दिक्ष्वपिवि लोचनमेवसाक्षी ॥ हाहंनहस्तमथदूरमहोकिमेतदा सीत्किशोरमयमंब जगत्त्रयं मे ॥ ५९ ॥ चिकुरं बहुलंविरलंभ्रमरं मृदुलंवचनंविपुलंनयनम् ॥ अधरंमधुरंललितंवदनं चपलंचरितंचकदानुभवे ॥ ६० ॥ परिपालयनः कृपालयेत्यसकृज्जल्पित मात्मबांधवः ॥ मुरलीमृदुलस्वनांतरेविभुराकर्ण यिताकदानुनः ॥ ६१ ॥ कदानुकस्यांनुविपद्दशा यांकैशोरगंधिः करुणांबुधिर्नः ॥ विलोचनाभ्यां विपुलायताभ्यां व्यालोकयिष्यन्विषयीक

रोति ॥ ६२ ॥ मधुरमधरबिंबेमंजुलमंदहासेशि
शिरममृतवादेशीतलंदृष्टिपाते ॥ विपुलमरुणने
त्रेविश्रुतंवेणुनादे मरकतमणिनीलंबालमालोक
येनु ॥६३॥ माधुर्यादपिमधुरंमन्मथतातस्यकिम
पिकैशोरम् ॥ चापल्यादपिचपलंचेतोममहरति
हंतकिंकुर्मः ॥ ६४ ॥ वक्षस्थलेचविपुलंनयनोत्प
लेचमंदस्मितेचमृदुलंमदजल्पितेच ॥ बिंबाधरेच
मधुरंमुरलीरवेचबालंविलासनिधिमाकलये कदा
नु ॥ ६५ ॥ आर्द्रावलोकितधरापरिणद्धनेत्रमावि
ष्कृतस्मितसुधामधुराधरोष्ठम् ॥ आद्यंपुमांसमव
तंसितबर्हिबर्हमालोकयंतिकृतिनः कृतपुण्यपुंजाः
॥ ६६ ॥ मारःस्वयंनुमधुरद्युतिमंडलंनुमाधुर्यमेव
नुमनोनयनामृतंनु ॥ वाणीमृजानुममजीवितवल्ल
भोनुबालोयमभ्युदयतेममलोचनाय ॥६७॥ बा
लोयमालोलविलोचनेनवक्त्रेणचित्रीकृतदिङ्मुखे
न ॥ वेषेणघोषोचितभूषणेनमुग्धेनदुग्धेनयनोत्स

वंनः ॥ ६८ ॥ आंदोलिताग्रभुजमाकुलनेत्रलील
मार्द्रस्मितार्द्रवदनांबुजचंद्रबिंबम् ॥ शिंजानभूष
णशतंशिखिपिच्छमौलिंशीतंविलोचनरसायनम
भ्युपैति ॥ ६९ ॥ शिशुपालबालपरिषद्विभूषणंशि
शुरेषशीतलविलोललोचनः ॥ मृदुलस्मितार्द्रवद
नेंदुसंपदामदयन्मदीयहृदयंविगाहते ॥७०॥ कि
मिदमधरवीथीक्लृप्तवंशीनिनादं किरतिनयनयो
र्नःकामपिप्रेमधाराम् ॥ तदिदममरवीथीदुर्लभंव
ल्लभंनस्त्रिभुवनभजनीयंदैवतंजीवितंच ॥ ७१ ॥
तदिदमुपनततमालनीलं तरलविलोचनतारका
भिराममम् ॥मुदितमुदितवक्त्रचंद्रबिंबंमुखरितवेणुवि
लासजीवितंमे ॥ ७२ ॥ चापल्यसीमचपलानु
भवैकसीमचातुर्यसीमचतुराननशिल्पसीम ॥ सौ
रभ्यसीमसकलाद्भुतकेलिसीमसौभाग्यसीमतदि
दंव्रजभाग्यसीम ॥ ७३ ॥ माधुर्येणद्विगुणशि
शिरंवक्त्रचंद्रंवहंती वंशीवीथीविगलदमृतस्रोतसा

सेचयंती ॥ मद्वाणीनांविहरणपदंमत्तसौभाग्य
भाजांमत्पुण्यानांपरिणतिरहोनेत्रयोःसन्निधत्ते ॥
॥७४॥ तेजसेऽस्तुनमोधेनुपालिनेलोकपालिने ॥
राधापयोधरोत्संगशायिने शेषशायिने ॥७५ ॥
धेनुपालदयितास्तनस्थलीधन्यकुंकुमसनाथकां
तये ॥ वेणुगीतगतिमूलवेधसेतेजसेतदिदमोंन
मोनमः ॥ ७६ ॥ मृदुक्कणन्नूपुरमंथरेणबालेनपा
दांबुजपल्लवेन ॥ अनुक्कणन्मंजुलवेणुगीतमायाति
मेजीवितमात्तकेलि ॥ ७७ ॥ सोयंविलासमुर
लीनिनदामृतेनसिंचन्नुदंचितमिदंममकर्णयुग्मम्।
आयातिमेनयनबंधुरनन्यबंधुरानंदकंदलितकेलि
कटाक्षलक्षः॥७८॥ दूराद्विलोकयतिवारणखेलगा
मीधाराकटाक्षभरितेनविलोचनेन ॥ आराहुपैति
हृदयंगमवेणुनादवेणीदुघेनदशनाभरणेनदेवः ७९।
त्रिभुवनसरसाभ्यांदृप्तभूषापराभ्यांदृशिदृशिशिशि
राभ्यांदिव्यलीलाकुलाभ्याम्॥ अशरणशरणाभ्या

मद्भुताभ्यां पदाभ्यामयमयमनुकूजद्वेणुरायाति
देवः॥८०॥सोयंमुनींद्रजनमानसतापहारीसोयंमद
व्रजवधूवसनापहारी ॥ सोयंतृतीयभुवनेश्वरदर्पहा
रीसोयंमदीयहृदयांबुरुहापहारी ॥ ८१ ॥ सर्वज्ञ
त्वेचमौग्ध्येचसार्वभौममिदंमहः ॥ निर्विशन्नयनं
हंतनिर्वाणपदमश्नुते ॥ ८२ ॥ मुष्णानमेतत्पुन
रुक्तशोभमुष्णेतरांशोरुदयंमुखेंदोः ॥ तृष्णांबुरा
शिंत्रिगुणीकरोतिकृष्णाह्वयंकिंचनजीवितंमे ८३॥
तदेतदाताम्रविलोचनश्रीसंभाविताशेषविनम्रवर्ग
म् ॥ मुहुर्मुरारेर्मधुराधरोष्ठंमुखांबुजंचुंबतिमानसंमे
॥८४॥ करौशरदुंदंचितांबुजविलासशिक्षागुरूपदौ
विबुधपादपप्रथमपल्लवोल्लंघिनौ ॥ दृशौद
लितदुर्मदत्रिभुवनोपमानश्रियौ विलोकयविलोच
नामृतमहोमहच्छैशवम् ॥८५॥ आचिन्वानमहन्य
हन्यहनि साकारान्विहारक्रमानारुंधानमरुंधतीहृद

यमप्यार्द्रस्मितास्यश्रिया ॥ आतन्वानमनन्यज-
न्यनयनश्लाघ्यामनर्घ्यांदशामामंदंव्रजसुंदरीस्तन-
तटीसाम्राज्यमुज्जृंभते ॥ ८६ ॥ समु-
च्छ्वसितयौवनंतरलशैशवालंकृतं मदच्छुरितलो-
चनं मदविमुग्धहासामृतम् ॥ प्रतिक्षणविलोभनंप्र-
णयपीतवंशीमुखंजगत्त्रयमनोहरं जयतिमामकंजी
वितम् ॥ ८७ ॥ चित्रंतदेतच्चरणारविंदंचित्रंत
देतन्नयनारविंदम् ॥ चित्रंतदेतद्वदनारविंदं चित्रं
तदेतत्पुनरेवचित्रम् ॥ ८८ ॥ अखिलभुवनैकभू
षणमधिभूषितजलधिदुहितृकुचकुंभम् ॥ व्रजयु
वतीहारावलिमरकतनायकमहामणिंवंदे ॥ ८९ ॥
कांताकचग्रहणविग्रहबद्धलक्ष्मीखंडांगरागरसरं-
जितमंजुलश्रीः ॥ गंडस्थलीमुकुरमंडलखेलमान
घर्मांकुरंकिमपिजृंभतिकृष्णतेजः ॥ ९० ॥ मधुरं
मधुरंवपुरस्यविभोर्मधुरंमधुरंवदनंमधुरम् ॥ मधुगं
धिमृदुस्मितमेतदहोमधुरंमधुरंमधुरंमधुरम् ॥ ९१ ॥

शृंगाररससर्वस्वंशिखिपिच्छविभूषणम् ॥ अंगी
कृतनिराकारमाश्रयेभुवनाश्रयम् ॥ ९२ ॥ ना
द्यापिपश्यतिकदाचनदर्शनेनचित्तेनवोपनिषदासु
दृशांसहस्रम् ॥ सत्वंचिरंनयनयोरनयोःपदव्यां
स्वामिन्कयानुकृपयाममसन्निधत्से ॥ ९३ ॥
केयंकांतिःकेशवत्वन्मुखेंदोःकोयंवेषः कापिवाचा
मभूमिः ॥ सेयंसेयंस्वाद्भुतामंजुलश्रीर्भूयोभूयो
भूयशस्तंनमामि ॥ ९४ ॥ वदनेंदुविनिर्ज्जितःश
शीदशधादेवपदंप्रपद्यते ॥ अधिकांश्रियमश्नुतेत
रांतवकारुण्यविजृंभितंकियत् ॥ ९५ ॥तत्त्वन्मुखं
कथमिवाब्जसमानकक्षंवाङ्माधुरीबहुलपर्वकला
समृद्धम् ॥ तत्किन्नुवेकिमपरंभुवनैककांतंयस्य
त्वदाननसमासुषमासदास्यात् ॥ ९६ ॥ शुश्रू
षसेयदिवचः शृणुमामकीनंपूर्वैरपूर्वकविभिर्नकटा
क्षितंयत् ॥ नीराजनक्रमधुरंभवदाननेंदोर्निर्व्या
जमर्हतिचिरायशशिप्रदीपः ॥ ९७ ॥ अखंड

निर्वाणरसप्रवाहैर्विखंडिताशेषरसांतराणि ॥ अ
यंत्रितोद्भ्रांतसुधार्णवानि जयंतिशीतानितवस्मि
तानि ॥ ९८ ॥ कामंसंतुसहस्रशःकतिपयेसार
स्यधौरेयकाः काममंवाकमनीयतापरिणतिस्वारा
ज्यबद्धव्रताः ॥ नैवैतैर्विवदामहेनचवयंदेवप्रियंब्रू
महेयत्सत्यंरमणीयतापरिणतिस्त्वय्येवपारंगता॥
॥ ९९ ॥ गलद्व्रीडालोलामदनवनितागोपवनिता
मधुस्फीतंगीतंकिमपिमधुराचापलधुरा ॥ समुज्जृं
भागुंफामधुरिमकिरांमादृशगिरांत्वयिस्थाने जाते
दधतिचपलंजन्मसफलम् ॥१००॥ भुवनंभवनंवि
लासिनीश्रीस्तनयस्तामरसासनःस्मरश्च ॥ परि
वारपरंपरासुरेंद्रास्तदपित्वच्चरितंविभोविचित्रम् ॥
॥ १०१ ॥ देवस्त्रिलोकीसौभाग्यकस्तूरीतिलकां
कुरः ॥ जीयाद्व्रजांगनानंगकेलिलालितविभ्रमः
॥ १०२ ॥ प्रेमदंचमेकामदंचमेवेदनंचमेवैभवं
चमे ॥ जीवनंचमेजीवितंचमेदैवतंचमेदेवनापरम्॥

॥ १०३ ॥ माधुर्येणविजृंभंतांवाचोनस्तववैभवे॥
चापल्येनविवर्धंतांचितानस्तवशैशवे ॥ १०४ ॥
यानित्वच्चरितामृतानि रसनालेह्यानिधन्यात्मनां
येवाचापलशैशवव्यतिकराराधापराधोन्मुखाः ॥
यावाभावितवेणुगीतगतयोलीलामुखांभोरुहे धारा
वाहिकयावहंतुहृदयेतान्येवतान्येवमे ॥ १०५ ॥
भक्तिस्त्वयिस्थिरतराभगवन्यदिस्याद्दैवेननःफलि
तदिव्यकिशोरवेषे ॥ मुक्तिःस्वयंमुकुलितांजलिसे
वतेस्माद्धर्मार्थकामगतयःसमयप्रतीक्षाः ॥१०६॥
जयजयजय देवदेवदेव त्रिभुवनमंगलदिव्यनामधे
य ॥ जयजयजयदेवदेवकृष्णश्रवणमनोनयना
मृतावतार ॥ १०७ ॥ तुभ्यं निर्भरहर्ष
वर्षविवशावेशस्फुटाविर्भवद्भूयश्चापलभूषितेषुसु-
कृताभावेषुनिर्भासते ॥ श्रीमद्गोकुलमंडनायमह
ते वाचांविदूरायते माधुर्यैकरसार्णवायमहसेकस्मै
चिदस्मैनमः ॥ १०८ ॥ ईशानदेवचरणा

भरणेन नीवीदामोदरस्थिरयशस्तबकोद्गमेन ॥ लीलांशुकेन रचितंतवदेवकृष्ण कर्णामृतं वहतु कल्पशतांतरेऽपि ॥१०९॥ धन्यानांसरसांनुलाप सरणीसौभाग्यमभ्यस्यतां कर्णानांविवरेषुकामपि सुधावृष्टिंदुहानंमुहुः ॥ वश्यानांसुदृशांमनोन यनयोर्मग्नस्यदेवस्यनः कर्णानांवचसांविजृंभितम होश्रीकृष्णकर्णामृतम् ॥ ११० ॥ अनुग्रहद्विगु णविशाललोचनैरनुस्वनद्विगुणगलद्द्रवामृतैः ॥ यतोयतःप्रसरतिमेविलोचनंततस्ततः स्फुरतुतवैव वैभवम् ॥१११॥ ॥ इति श्रीलीलाशुकविरचिते श्रीकृष्णकर्णामृते प्रथमशतकं समाप्तम् ॥ १ ॥

श्रीमद्राधावल्लभोजयत्यतितराम् ॥ अभिनवन वनीतस्निग्धमापीतदुग्धंदधिकणपरिदिग्धंमुग्ध मंगंमुरारेः ॥ दिशतुभुवनकृच्छ्रच्छेदितापिच्छगु च्छच्छविनवशिखिपिच्छैर्लांछितंवांछितंनः १॥

यांदृष्ट्वायमुनां पिपासुरनिशं व्यूहोगवांगाहते वि
द्युत्त्वानितिनीलकंठनिवहोयांद्रष्टुमुत्कंठते ॥ उत्तं
सायतमालपल्लवमितिच्छिंदंतियां गोपिकाःकां
तिः कालियशासनस्यवपुषःसापावनीपातुनः ॥
॥२॥ मातर्नातः परमनुचितंयत्खलानांपुरस्ताद
स्ताशंकंजठरपिठरीपूर्तयेनर्तितासि ॥ तत्क्षंतव्यं
सहजसरलेवत्सलेवाणिकुर्वे प्रायश्चित्तंगुणगणन
यागोपवेषस्यविष्णोः ॥ ३ ॥देवःपायात्पयसि
विमलेयामुनेमज्जतीनांयाचंतीनामनुनयपदैर्वंचि
तान्यंशुकानि ॥ लज्जालोलैरलसविलसैरुन्मि
षत्पंचबाणैर्गोपस्त्रीणां नयनकुसुमैरर्चितः केशवो
नः ॥ ४ ॥ अंगुल्यग्रैररुणकिरणैर्मुक्तसंरुद्धरंध्रंवारं
वारंवदनमरुता वेणुमापूरयंतम् ॥ व्यत्यस्तांघ्रिवि
कचकमलच्छायविस्तारिनेत्रं वृंदेवृंदावनसुचरि
तंनंदगोपालसूनुम् ॥ ५ ॥ वेणीमूलेविरचितघन
श्यामपिच्छावचूडोविद्युल्लेखावलयितइव स्निग्ध
पीतांबरेण ॥ मामालिंगन्मरकतमणिस्तंभगंभीर

बाहुःस्नेहहृष्टस्तरुणतुलसीभूषणो नीलमेघः ॥
॥६॥मंदंमंदं मधुरनिनदैर्वेणुमापूरयंतं वृंदंवृंदावन
भुविगवांचारयंतंचरंतम् ॥ छंदोभाग्यंशतमखमु
खध्वंसिनांदानवानांहंतारंतंकथयरसने गोपकन्या
भुजंगम् ॥ ७ ॥ कृष्णेहृत्वासिचयनिचयंकूलकुं
जाधिरूढेमुग्धाकाचिन्मुहुरनुनयैःकिन्विंतिव्याह
रंती ॥ सभ्रूभंगंसदरहसितंसत्रपंसानुरागंछाया
शौरेः करतलगतान्यंबराण्याचकर्ष ॥ ८ ॥
अपिजनुषिपरस्मिन्नात्तपुण्यो भवेयंतटभुवियमु
नायास्तादृशोवंशनालः॥ अनुभवतियएषश्रीमदा
भीरसूनोरधरमणिसमीपन्यासधन्यामवस्थाम् ॥
॥ ९ ॥ अयिपरिचिनुचेतःप्रातरंभोजनेत्रंकब
रकलितचंचत्पिच्छदामाभिरामम् ॥ बलभिदुप
लनीलंबल्लवीभागधेयंनिखिलनिगमवल्लीमूलकंदं
मुकुंदम् ॥ १० ॥ अयिमुरलिमुकुंदस्मेरवक्त्रार
विंदश्वसनमधुरसज्ञेत्वांप्रणम्याद्ययाचे ॥ अधर

मणिसमीपंप्राप्तवत्यां भवत्यांकथयरहसिकर्णेमद्द-
शांनंदसूनोः ॥ ११ ॥ सजलजलदनीलंबल्लवीके
लिलोलंश्रितसुरतरुमूलंविद्युदुल्लासिचैलम् ॥ सु-
ररिपुकुलकालंसन्मनोबिंबलीलंनतसुरमुनिजालं
नौमिगोपालबालम् ॥ १२ ॥अधरबिंबविडंबित
द्रुमंमधुरवेणुनिनादविनोदिनम् ॥ कमलकोमलन
म्रमुखांबुजंकमपिगोपकुमारमुपास्महे ॥ १३ ॥
अधरेविनिवेश्य वंशनालं विवराण्यस्यसलीलमं
गुलीभिः ॥ मुहुरंतरयन्मुहुर्विवृण्वन्मधुरंगायति
माधवोवनांते ॥ १४ ॥ वदनेनवनीतगन्धवाहं
वचनेतस्करचातुरीधुरीणम् ॥ नयनेकुहकाश्रुमा
श्रयेथाश्चरणेकोमलतांडवंकुमारम् ॥ १५ ॥
अमुनाखिलगोपगोपनार्थंयमुनारोधसिनंदनंदने
न ॥ दमुनावनसंभवःपपेनःकिमुनासौशरणार्थि-
नांशरण्यः ॥ १६ ॥ जगदादरणीयजारभावंज
लजापत्यवचोविचारगम्यम् ॥ तनुतांतनुतांशि

घेतराणांसुरनाथोपलसुंदरंमहोनः ॥ १७ ॥ या
शेखरेश्रुतिगिरांहृदियोगभाजां पादांबुजेचसुल
भाव्रजसुंदरीणाम् ॥ साकापिसर्वजगतामभिराम
सीमाकामायनोभवतुगोपकिशोरमूर्त्तिः ॥ १८ ॥
अत्यंतबालमतसीकुसुमप्रकाशंदिग्वाससंकनक-
भूषणभूषितांगम् ॥ विस्रस्तकेशमरुणाधरमा
यताक्षंकृष्णंनमामिमनसावसुदेवसूनुम् ॥ १९ ॥
हस्तांघ्रिनिक्कणितकंकणकिंकिणीकंमध्येनितंबम
वलंबितहेमसूत्रम् ॥ मुक्ताकलापमुकुलीकृतका
कपक्षंवंदामहेव्रजचरंवसुदेवभाग्यम् ॥ २० ॥
वृंदावनद्रुमतलेषुगवांगणेषु वेदावसानसमयेषुच
दृश्यतेयत् ॥ तद्वेणुनादनपरंशिखिपिच्छचूडंब्रह्म
स्मरामिकमलेक्षणमभ्रनीलम् ॥ २१ ॥व्यत्यस्त
पादमवतंसितबर्हिबर्हं साचीकृताननिवेशितवे
णुरंध्रम् ॥ तेजःपरंपरमकारुणिकंपुरस्तात्प्राणप्र
याणसमयेममसन्निधत्ताम् ॥ २२ ॥ घोषप्रघोष

शमनार्थमथोगुणेन मध्येबबंध जननीनवनीतचो-
रम् ॥ तद्बंधनंत्रिजगतामुदराश्रयाणामाक्रोशका
रणमहोनितरांबभूव ॥ २३ ॥ शैवावयंनखलुतत्र
विचारणीयंपंचाक्षरीजपपरानितरांतथापि ॥ चे
तोमदीयमतसीकुसुमावभासं स्मेराननं स्मरतिगो
पवधूकिशोरम् ॥ २४ ॥ राधापुनातुजगदच्युत
दत्तचित्तामंथानमाकलयतीदधिरिक्तपात्रे॥ तस्याः
स्तनस्तबकचंचललोलदृष्टिर्देवोऽपिदोहनधियावृष
भंनिरुंधन् ॥ २५ ॥ गोधूलिधूसरितकोमलकुंत
लाग्रंगोवर्द्धनोद्धरणकेलिकृतप्रयासम् ॥ गोपीजन
स्यकुचकुंकुममुद्रितांगं गोविंदमिंदुवदनं शरणंभ
जामः ॥ २६ ॥ यद्रोमरंध्रपरिपूर्तिविधावदक्षावा
राहजन्मनिबभूवुरमीसमुद्राः ॥ तंनामनाथमर
विंदहशंयशोदापाणिद्वयान्तरजलैः स्नपयांबभूव
॥ २७ ॥ परमिममुपदेशमाद्रियध्वंनिगमवनेषु
नितांतचारखिन्नाः ॥ विचिनुतभवनेषुबल्लवी

नाम्नुपनिषदर्थमुलूखलेनिबद्धम् ॥ २८ ॥ देवकी
तनयपूजनपूतःपूतनारिचरणोदकधूतः ॥ यद्यहंस्मृ
तधनंजयसूतःकिंकरिष्यतिसमेयमदूतः ॥ २९ ॥
भासतांभवत्रयैकभेषजंमानसेममम्मुहुर्मुहुर्मुहुः ॥
गोपवेषमुपसेदुषःस्वयं यापि कापिरमणीयताविभोः ॥ ३० ॥ कर्णलंबितकदंबमंजरीकेसरारुण
कपोलमंडलम् ॥ निर्मलंनिगमवागगोचरंनीलि
मानमवलोकयामहे ॥ ३१ ॥ साचिसंचलितलो
चनोत्पलंसामिकुड्मलितकोमलाधरम् ॥ वेगव
ल्गितकरांगुलीमुखंवेणुनादरसिकंभजामहे ॥३२॥
स्यंदनेगरुडमंडितध्वजे कुंडिनेशतनयाधिरोपि
ता ॥ केनचिन्नवतमालपल्लवश्यामलेनपुरुषेण
नीयते ॥ ३३ ॥ मायातपांथाःपथिभीमरथ्यादि
गंबरःकोपितमालनीलः ॥ विन्यस्तहस्तोपिनि
तंबबिंबेधूतःसमाकर्षतिचित्तवित्तम् ॥ ३४ ॥ अं
गनामंगनामंतरेमाधवोमाधवंमाधवं चांतरेणांग

ना ॥ इत्थमाकल्पितेमंडलेमध्यगःसंजगौवेणुना
देवकीनंदनः ॥ ३५ ॥ केकिकेकाहृतानेकपंकेरु
हालीनहंसावलीहृद्यताहृद्यता ॥ कंसवंशाटवीदा
हदावानलःसंजगौ० ॥ ३६ ॥ क्कापिवीणाभिरा
राविणाकंपितःक्कापिवीणाभिराकिंकिणीनर्तितः ॥
क्कापिवीणाभिरामांतरंगायितःसंजगौ० ॥ ३७ ॥
चारुचन्द्रावलीलोचनैश्चुंबितोगोपगोवृंदगोपालि
कावल्लभः ॥ बल्लवीवृंदवृंदारकःकामुकःसंजगौ०
॥ ३८ ॥ मौलिमालामिलन्मत्तभृंगीलताभीतभी
तप्रियाविश्लथालिंगितः ॥ स्रस्तगोपीकुचाभोग
संमेलितःसंजगौ० ॥ ३९ ॥ चारुचामीकराभास
मानांबरोवैजयंतीलताभासितोरस्थलः ॥ नन्दवृ
न्दावनेवासितामध्यगःसंजगौ० ॥ ४० ॥बालिका
तालिकाताललीलालयासंगसंदर्शितभ्रूलताविभ्र
मः॥गोपिकागीतदत्तावधानःस्वयंसंजगौवेणुना०
॥ ४१ ॥ पारिजातंसमुद्धृत्यराधावरोरोपयामास

भामागृहस्यांगणे ॥ शीतशीतेवटेयामुनीयेतटेसं
जगौ० ॥ ४२ ॥ अग्रेदीर्घतरोयमर्जुनतरुस्तस्या
ग्रतोवर्तिनीसाघोषंसमुपैति तत्परिसरे देशेकलिं
दात्मजा ॥ तस्यास्तीरतमालकाननतलेचक्रंग
वांचारयन्गोपःक्रीडतिदर्शयिष्यतिसखेपंथानम
व्याहतम् ॥४३॥ गोधूलिधूसरितकोमलगोपवेषं
गोपालबालकशतैरनुगम्यमानम् ॥ सायंतने
प्रतिगृहंपशुबंधनार्थं गच्छंतमच्युतशिशुं प्रणतो
ऽस्मिनित्यम् ॥ ४४ ॥ निधिंलावण्यानांनिखिल
जगदाश्चर्यनिलयंनिजावासम्भासांनिरवधिकनिश्रे
यसरसम् ॥ सुधाधारासारंसुकृतपरिपाकंमृगदृ
शांप्रपद्येमांगल्यं प्रथममधिदैवं कृतधियाम् ॥
॥ ४५ ॥ आताम्रपाणिकमलंप्रणयिप्रतोदमालो
लहारमणिकुण्डलहेमसूत्रम् ॥ आविःश्रमांबुक
णमंबुदनीलमव्यादाद्यं धनंजयरथाभरणं महो नः
॥ ४६ ॥ नखनियमितकंडून्पांडवस्यंदनाश्वान

नुदिनमभिषिंचन्नंचलिस्थैः पयोभिः ॥ अवतुवित
तगात्रस्तोत्रसंस्यूतमौलिर्दशनविधृतरशिमर्देवकी
पुण्यराशिः ॥ ४७ ॥ व्रजयुवतिसहायेयौवनोल्ला
सिकायेसकलशुभविलासेकुंदमंदारहासे ॥ मुनि
सरसिजभानौनंदगोपालसूनौ निवसतुममचित्तं
तत्पदायत्तवृत्तम् ॥ ४८ ॥ अरण्यानीमार्द्रस्मि
तमधुरबिंबाधरसुधासरण्यासंक्रांतैःसपदिमदयन्वे
णुनिनदैः ॥ धरण्यासानंदोत्पुलकमुपगूढांघ्रि
कमलःशरण्यानामाद्यः सजयतिशरीरीमधुरिमा
॥ ४९ ॥ मुग्धंस्निग्धंमधुरमुरलीमाधुरीधीरनादैः
कारंकारंकरणविवशंगोकुलव्याकुलत्वम् ॥ श्या
मंकामंयुवजनमनोमोहनंमोहनांगंचित्ते नित्यंनि
वसतुमहोबल्लवीवल्लभंनः ॥ ५० ॥ विदग्धगोपाल
विलासिनीनांसंभोगचिह्नांकितसर्वगात्रम् ॥ प
वित्रमाम्नायगिरामगम्यं ब्रह्मप्रपद्ये नवनीतचोर
म् ॥ ५१ ॥ आनंदेनयशोदयासमदनंगोपांगना

भिश्चिरं साशंकं बलविद्विषासकुसुमैः सिद्धैः पथि व्याकुलम् ॥ सेर्ष्यंगोपकुमारकैः सकरुणंपौरैर्जनैः सस्मितंयोदृष्टः सपुनातुनोऽसुररिपुः प्रोत्क्षिप्तगोवर्धनः ॥ ९२ ॥ अंतर्गृहेकृष्णमवेक्ष्यचोरंबद्ध्वाकपाटंजननीगतैका ॥ उलूखलेदामनिबद्धमेनंतत्रापिदृष्ट्वास्तिमिताबभूव ॥ ९३ ॥ रत्नस्थलेजानुचरः कुमारः संक्रांतमात्मीयमुखारविंदम् ॥ आदातुकामस्तदलाभखेदाद्विलोक्यधात्रीवदनंरुरोद ॥ ९४ ॥ उपासतामात्मविदः पुराणाः परंपुमांसंनिहितंगुहायाम् ॥ वयंयशोदाशिशुबाललीलाकथासुधासिंधुषुलीलयामः ॥ ९५ ॥ विक्रेतुकामाकिलगोपकन्या मुरारिपादार्पितचित्तवृत्तिः॥ दध्यादिकंमोहवशादवोचद्गोविंददामोदरमाधवेति ॥ ९६ ॥ उलूखलं वा यमिनांमनो वा गोपांगनानांकुचकुङ्कुमलंबा ॥ मुरारिनाम्नः

२

कलभस्यनूनमालानमासीत्त्रितयंहिलोके ॥५७॥
करारविंदेनपदारविंदंमुखारविंदेविनिवेशयंतम् ॥
वटस्यपत्रस्यपुटेशयानंबालंमुकुंदंमनसा स्मरामि
॥ ५८ ॥ शंभोस्वागतमास्यतामितइतो वामेनप
द्मासनेक्रौंचारेकुशलंसुखंसुरपतेवित्तेशनोदृश्यसे॥
इत्थंस्वप्नगतस्यकैटभजितः श्रुत्वायशोदागिरः
किंकिंबालकजल्पसीतिरचितंथूथूकृतंपातुनः५९॥
मातःकिंयदुनाथदेहिचषकं किंतेनपातुं पयस्तन्ना
स्त्यद्यकदास्तिवानिशिनिशाकावांधकारोदयः ॥
आमील्याक्षियुगंनिशाप्युपनता देहीति मातुर्मुहुर्व
क्षोजांबरकर्षणोद्यतकरः कृष्णः सपुष्णातुनः६०।
कालिंदीपुलिनोदरेषुमुसलीयावद्गतः खेलितुंताव
त्कर्बुरिकांपयः पिबहरेवर्धिष्यतेतेशिखा ॥ इत्थं
बालतयाप्रतारणपराः श्रुत्वायशोदागिरः पायान्नः
स्वशिखांस्पृशन्प्रमुदितः क्षीरेर्धपीतेहरिः ॥६१॥
किंचित्कुंचितलोचनस्यापिबतः पर्यायपीतंस्तनंस

द्यः प्रस्तुतदुग्धबिंदुमपरंहस्तेनसंमार्जतः ॥ मा
त्रैकांगुलिलालितस्यचुबुके स्मेराननस्याधरेशौरेः
क्षीरकणान्वितानिपतितादंतद्युतिः पातुनः ॥६२॥
कैलासोनवनीततिक्षितिरियं प्राग्जग्धमृल्लोष्टति
क्षीरोदोपिनिपीतदुग्धतिलसत्स्मेरप्रफुल्ले मुखे ॥
मात्राऽजीर्णधियाहृढंचकितयानष्टास्मिदृष्टः कया
थूथूवत्सकजीवजीवचिरमित्युक्तोवतान्नो हरिः॥
॥६३॥ उत्तुंगस्तनमंडलेपरिलसत्प्रालंबमुक्तामणे
रंतर्बिंबितमिंद्रनीलनिकरच्छायानुकारिद्युतिः ॥
लज्जाव्याजमुपेत्य नम्रवदना स्पष्टं मुरारेर्वपुः
पश्यंतीमुदितामुदेऽस्तुभवतां लक्ष्मीर्विवाहोत्सवे
॥ ६४ ॥ कृष्णेनांबगतेनरंतुमधुनामृद्भक्षितास्वे
च्छयासत्यंकृष्णकएवमाहमुसली मिथ्यांबपश्या
ननम् ॥ व्यादेहीतिविदारितेशिशुमुखेदृष्ट्वासम
स्तंजगन्मातायस्यजगाम विस्मयपदंपायात्सनः
केशवः ॥ ६५ ॥ स्वातीसपत्नीकिलतारकाणांमु

क्ताफलानांजननीतिरोषात् ॥ सारोहिणीनीलम
सूतरत्नंकृतास्पदंगोपवधूकुचेषु ॥ ६६ ॥ नृत्यंत
मत्यंतविलोकनीयंकृष्णंमणिस्तंभगतंमृगाक्षी ॥
निरीक्ष्य साक्षादिवकृष्णमग्रेद्वधावितेनेनवनीतमे
कम् ॥६७॥ वत्सजागृहिविभातमागतंजीवकृष्ण
शरदांशतंशतम् ॥ इत्युदीर्यसुचिरंयशोदयाद
श्यमानवदनांबुजंभजे ॥ ६८॥ ओष्ठंजिघ्रन्छि
शुरितिधियाचुंबितोबल्लवीभिः कंठंगृह्णन्नरुणितपदं
गाढमालिंगितांगः ॥ दोष्णालज्जापदमभिमृश
न्नंकमारोपितात्माधूर्तस्वामीहरतुदुरितंदूरतो बाल
कृष्णः ॥ ६९ ॥ एतेलक्ष्मणजानकीविरहितंमां
खेदयंत्यंबुदाऽमर्माणीवचघट्टयंत्यलममी क्रूराः क
दंबानिलाः ॥ इत्थंव्याहृतपूर्वजन्मचरितोयोराध
यावीक्षितः सेर्ष्यंशंकितयासनःसुखयतु स्वप्नाय
मानोहरिः ॥ ७० ॥ ओष्ठंमुंचहरेबिभेमिभव
तापानैहंतापूतनाकंठाश्लेषममुंजहीहि दलितावा

लिंगनेनार्जुनौ ॥ मादेहिच्छुरितंहिरण्यकशिपु
र्नीतोनखैः पंचतामित्थं वारितरात्रिकेलिरवताल्ल
क्ष्म्यापहासाद्धरिः ॥ ७१ ॥ रामोनामबभूवहुं
तदबलासीतेतिहुंतांपितुर्वाचापंचवटीतटे विहरत
स्तस्याहरद्रावणः ॥ निद्रार्थंजननीकथामितिहरे
र्हुंकारतःशृण्वतः सौमित्रेक्कधनुर्धनुर्धनुरितिव्यग्रा
गिरःपांतु वः ॥ ७२ ॥ बालोपिशैलोद्धर
णाग्रपाणिर्नीलोपिनीरंध्रतमःप्रदीपः ॥ धीरोपि
राधानयनावबद्धोजारोपिसंसारहरःकुतस्त्वम् ॥
॥ ७३ ॥ बालायनीलवपुषेनवकिंकिणीकजाला
भिरामजघनायदिगंबराय ॥ शार्दूलदिव्यनख
भूषणभूषितायनंदात्मजायनवनीतमुषे नमस्ते ॥
॥ ७४ ॥ पाणौपायसभक्तमाहितरसंबिभ्रन्मुदा
दक्षिणेसव्ये शारदचंद्रमंडलनिभंहैयंगवीनंदध
त् ॥ कंठेकल्पितपुंडरीकनखमप्युद्दामदीप्तिंदधद्दे
वोदिव्यदिगंबरोदिशतुनः सौख्यंयशोदाशिशुः ॥

॥ ७५ ॥ किंकिणिकिंकिणिकिंणिरभसैरंगणभुविरिं
गणैःसदाऽटंतम् ॥ कुणुकुणुकुणुपदयुगलंकंकण
करभूषणंहरिंवंदे ॥ ७६ ॥ संबाधेसुरभीणामंबा
मायासयंतमनुयांतीम् ॥ लंबालकमवलंबेतंबालं
तनुविलग्नजंबालम् ॥ ७७ ॥ अंचितपिच्छाचूडंवं
चितसौजन्यबल्लवीवलयम् ॥ अधरमणिनिहित
वेणुंबालंगोपालमनिशमवलंबे ॥ ७८ ॥ प्रह्लाद
भागधेयंनिगममहाद्रिगुहांतराधेयम् ॥ नरहरिप
दाभिधेयंविबुधविधेयंममानुसंधेयम् ॥ ७९ ॥ सं
सारेकिंसारंकंसारेश्चरणयुगलपरिभजनम् ॥
ज्योतिःकिमंधकारेयदंधकारेरनुस्मरणम् ॥ ८० ॥
कलशनवनीतचोरेकमलादृक्कुमुदचंद्रिकापूरे ॥
विहरतुनंदकुमारेचेतोममगोपसुंदरीजारे ॥ ८१ ॥
कस्त्वंबालबलानुजः किमिहतेमन्मंदिराशंकयाशू
ह्येतन्नवनीतपात्रविवरेहस्तंकिमर्थंन्यसेः ॥ मातः
कंचनवत्सकंमृगयितुंमागाविषादंक्षणादित्येवंवर

बल्लवीप्रतिवचःकृष्णःसपुष्णातुनः ॥ ८२ ॥ गो
पालाजिरकर्दमे विहरसे विप्राध्वरेलज्जसेब्रूषेगो
धनहुंकृतैःस्तुतिशतैर्मौनंविधत्सेविदाम् ॥ दास्यं
गोकुलपुंश्चलीषुकुरुषेस्वाम्यंनदांतात्मसुज्ञातं कृ
ष्णतवांघ्रिपंकजयुगंप्रेमाचलंमंजुलम् ॥ ८३ ॥न
मस्तस्मैयशोदायादायादायास्तुतेजसे ॥ यद्धिरा
धामुखांभोजंभोजंभोजंव्यवर्धत ॥ ८४ ॥ अवता
राःसंत्यन्येसरसिजनयनस्यसर्वतोभद्राः ॥ कृ
ष्णादन्यःकोवाप्रभवतिगोगोपगोपिकामुक्त्यै ॥
॥८५॥ मध्येगोकुलमंडलंप्रतिदिशंचांभारवोज्जृं
भितेप्रातर्दोहमहोत्सवेनवघनश्यामंरणन्नूपुरम् ॥
भालेबालविभूषणंकटिरटत्सत्किंकिणीमेखलंकंठे
व्याघ्रनखंचशैशवकलाकल्याणकात्स्न्यंभजे ॥
॥८६॥ सजलजलदनीलंदर्शितोदारलीलंकरत
लधृतशैलंवेणुवाद्येरसालम् ॥ व्रजजनकुलपा
लंकामिनीकेलिलोलंकलितललितमालंनौमिगो

पालबालम् ॥ ८७ ॥ स्मितललितकपोलंस्नि
ग्धसंगीतलोलंललितचिकुरजालंचौर्यचातुर्यली
लम् ॥ शतमखरिपुकालंशातकुंभाभचैलंकुवल
यदलनीलंनौमि० ॥ ८८ ॥ मुरलिनिनदलोलं
मुग्धमायूरचैलं दलितदनुजजालं धन्यसौजन्य
लीलम् ॥ परहितनवहेलंपद्मसद्मानुकूलंनवजलध
रनीलंनौमि० ॥ ८९ ॥ सरसगुणनिकायंस
च्चिदानंदकायंशमितसकलमायं सत्यलक्ष्मीसहा
यम् ॥ शमदमसमुदायंशांतसर्वांतरायंसुहृदयज
नदायंनौमि० ॥ ९० ॥ लक्ष्मीकलत्रंललिताब्ज
नेत्रंपूर्णेंदुवक्त्रंपुरुहूतमित्रम् ॥ कारुण्यपात्रंकम
नीयगात्रंवंदेपवित्रंवसुदेवपुत्रम् ॥ ९१ ॥ मदम
यमदमयदुरगंयमुनामवतीर्यवीर्यशालीयः ॥ म
मरतिममरतिरस्कृतिशमनपरःसक्रियात्कृष्णः ॥
॥ ९२ ॥ मौलौमायूरबर्हंमृगमदतिलकंचारुला
लाटपट्टे कर्णद्वंद्वेचतालीदलमतिमृदुलंमौक्तिकं

नासिकायाम् ॥ हारोमंदारमालापरिमलभरिते
कौस्तुभस्योपकंठे पाणौवेणुश्चयस्यव्रजयुवतियुतः
पातुपीतांबरो नः ॥ ९३ ॥ मुरारिणावारिविहा
रकाले मृगेक्षणानांमुषितांशुकानाम् ॥ करद्व
यंवाकचसंहतिर्वाप्रमीलनंवापरिधानमासीत ॥
॥ ९४ ॥ लोकानुद्धरयन्श्रुतीर्मुखरयन्क्षोणी
रुहान्हर्षयञ्शैलान्विद्रवयन्मृगान्विवशयन् गोवृं
दमानंदयन् ॥ गोपान्संभ्रमयन्मुनीन्मुकुल
यन्सप्तस्वराञ्जृंभयन्नोंकारार्थमुदीरयन् विजयते
वंशीनिनादः शिशोः ॥ ९५ ॥ देवक्याज
ठराकरेसमुदितः क्रीतोगवांपालिनानंदेनानकदुं
दुभेर्निजसुतापण्येनपुण्यात्मना ॥ गोपालावलि
मुग्धहारतरलो गोपीजनालंकृतिः स्थेयान्मेहृदि
संततंसुमधुरःकोपींद्रनीलोमणिः ॥ ९६ ॥ या
सांगोपांगनानां लसदसिततरालोललीलाकटा
क्षायन्नासाचारुमुक्तामणिरुचिनिकरव्योमगंगाप्र

वाहे ॥ मीनायंतेपिताासामतिरभसचलञ्चारु
लोलालकांताभृंगायंतेयदंघ्रिद्वयसरसिरुहेपातु पी
तांबरोनः ॥ ९७ ॥ यद्वेणुश्रेणिरूपस्थितसु
षिरमुखोद्गीर्णनादप्रभिन्ना एणाक्ष्यस्तत्क्षणेनत्रुटि
तनिजपतिप्रेमबंधाबभूवुः ॥ अस्तव्यस्ताल
कांताःस्फुरदधरकुचद्वंद्वनाभिप्रदेशाः कामावेश
प्रकर्षप्रकटितपुलकाःपातुपीतांबरोनः ॥ ९८ ॥
पीठेपीठनिषण्णबालकगलेतिष्ठन्सगोपालको यं
त्रांतस्थितदुग्धभांडमवकृष्याच्छाद्यघंटारवम् ॥
वक्रोपांतकृतांजलिःकृतशिरःकंपं पयोयोपिबत्सो
व्यादागतगोपिकानयनयोर्गंडूषफूत्कारकृत् ९९ ॥
त्वयिप्रसन्ने मयिकिंगुणेन त्वय्यप्रसन्नेमयिकिंगु
णेन ॥ रक्तेविरक्तेदयितेंगनानांवृथाभवेत्कुंकुमपत्र
भंगः ॥ १०० ॥ यज्ञैरीजिमहेधनंददिमहेपात्रे
षुनूनंवयंवृद्धान्भोजिमहेतपश्चकृमहेजन्मांतरेदुश्चर
म् ॥ येनास्माकमभूदनन्यसुलभाभक्तिर्भवद्वेषि

णीचाणूरद्विषिभक्तकल्मषमुषिश्रेयःपुषि श्रीजुषि
॥ १ ॥ गायंतिक्षणदाविरामसमयेसानंदमिंदुप्रभा
रुंद्धत्योनिजदंतकांतिनिवहैर्गोपांगनागोकुले ॥ म
थ्नंत्योदधिपाणिकंकणझणत्कारानुरूपं जवाद्व्या
लोलद्वसनांचलायमनिशंपीतांबरोऽव्यात्स नः ॥
॥ २ ॥ अंसालंबितवामकुंडलधरंमंदोन्नतभ्रूलतं
किंचित्कुंचितकोमलाधरपुटंसाचिप्रसारेक्षणम् ॥
आलोलांगुलिपल्लवैर्मुरलिकामापूरयंतं मुदामूले
कल्पतरोस्त्रिभंगिललितंध्यायेजगन्मोहनम् ॥३॥
मल्लैःशैलेंद्रकल्पःशिशुरितरजनैः पुष्पचापोऽगना
भिर्गोपैस्तुप्राकृतात्मा दिविकुलिशभृताविश्वका
योऽप्रमेयः ॥ क्रुद्धःकंसेनकालोभयचकितदृशायो
गिभिर्ध्येयमूर्तिर्दृष्टोरंगावतारो हरिरमरगणानंद
कृत्पातुयुष्मान् ॥४॥ संविष्टोमणिविष्टरेंकतल
मध्यासीनराधामुखे कस्तूरीतिलकंमुदाविरचयन्
हर्षात्कुचौसंस्पृशन् ॥ अन्योन्यस्मितचंद्रिकाकि

सलयैराराधयन्मन्मथं गोपीगोपपरीवृतो यदुप
तिःपायाज्जगन्मोहनः ॥ ५ ॥ आकृष्टेत्रसनांचले
कुवलयश्यामांह्रियाधःकृताहृष्टिः संवलिताहृचा
कुचयुगेस्वर्णप्रभेश्रीमति ॥ बालःकश्चनचूतपल्लव
इतिभ्रांत्यास्मितास्यश्रियंश्लिष्यंस्तामथरुक्मिणीं
नतमुखीं कृष्णःसपुष्णातुनः ॥ ६ ॥ उर्व्यांको
ऽपिमहीधरोलघुतरोदोर्भ्यां धृतोलीलयातेनत्वंदि
विभूतलेचसततंगोवर्धनोद्धारकः ॥ त्वांत्रैलोक्य
धरंवहामिकुचयोरग्रेनतद्गण्यते किंवाकेशवभाष
णेनबहुनापुण्यैर्यशोलभ्यते ॥ ७ ॥ संध्यावंदन
भद्रमस्तुभवतेभोस्नानतुभ्यंनमो भोदेवाःपितर
श्चतर्पणविधौनाहंक्षमःक्षम्यताम् ॥ यत्रक्कापिनि
षद्ययादवकुलोत्तंसस्यकंसद्विषः स्मारंस्मारमघं
हरामितदलं मन्येकिमन्येनमे ॥ ८ ॥ हेगोपाल
कहेकृपाजलनिधेहेसिन्धुकन्यापते हेकंसांतकहे
गजेंद्रकरुणापारीणहेमाधव ॥ हेरामानुजहेज

गत्त्रयगुरोहेपुंडरीकाक्ष मां हेगोपीजननाथपाल
यपरंजानामिनत्वांविना ॥ ९ ॥ कस्तूरीतिलकं
ललाटपटलेवक्षस्थलेकौस्तुभं नासाग्रेनवमौक्ति
कंकरतलेवेणुंकरेकंकणम् ॥ सर्वांगेहरिचंदनंच
कलयन्कंठेचमुक्तावलिंगोपस्त्रीपरिवेष्टितो विज
यतेगोपालचूडामणिः ॥ ११० ॥ यस्यात्मभूत
स्यगुरोःप्रसादादहंविमुक्तोस्मिशरीरबंधात् ॥ स
र्वोपदेष्टुः पुरुषोत्तमस्यतस्यांघ्रिपद्मंप्रणतोस्मिनि
त्यम् ॥ १११ ॥ ॥ इति श्रीलीलाशुकविरचिते
श्रीकृष्णकर्णामृते द्वितीयशतकं समाप्तम् ॥ २ ॥

अस्तिस्वस्त्ययनं समस्तजगतामभ्यस्तलक्ष्मी
स्तनं वस्तुध्वस्तरजस्तमोभिरनिशंन्यस्तं पुरस्ता
दिव ॥ हस्तोदस्तगिरींद्रमस्तकतरुप्रस्तारविस्ता
रितस्रस्तस्वस्तरुसूनसंस्तरलसत्प्रस्ताविराधास्तु
तम्॥१ ॥ राधाराधितविभ्रमाद्भुतरसंलावण्यरत्ना

करंसाधारण्यपदव्यतीतसहजस्मेराननांभोरुहम् ।
आलंबेहरिनीलगर्वगुरुतासर्वस्वनिर्वापणं बालं
वैणविकंविमुग्धमधुरंमूर्द्धाभिषिक्तं महः ॥ २ ॥
करिणामलंघ्यगतिवैभवं भजे करुणावलं
बितकिशोरविग्रहम् ॥ यमिनामनारतविहारिमा
नसेयमुनावनांतरसिकंपरंमहः ॥ ३ ॥ अतंत्रि
तत्रिजगदपिव्रजांगनानियंत्रितं विपुलविलोचना
ज्ञया ॥ निरंतरंममहृदयेविजृंभतांसमंततःसरस
तरंपरंमहः ॥ ४ ॥ कंदर्पप्रतिमल्लकांतिविभवंका
दंबिनीबांधवं वृन्दारण्यविलासिनीव्यसनिनं वेषे
णभूषामयम् ॥ मंदस्मेरमुखांबुजंमधुरिमव्यामृष्ट
बिंबाधरं वंदेकंदलिताद्रयौवनवनं कैशोरकंशा
र्ङ्गिणः ॥ ५ ॥ आमुक्तमानुषममुक्तनिजानुभावमा
रूढविग्रहमगूढविदग्धलीलम् ॥ आमृष्टयौवनम
नष्टकिशोरभावमाद्यंमहः किमपि माद्यतिमान
सेमे ॥ ६ ॥ तेतेभावाः सकलजगतीलोभनीयप्र

भावानानातृष्णासुहृदिहृदिमेकाममाविर्भवंतु ॥
वीणावेणुक्कणितलसितस्मेरवक्रारविंदान्नाहं जाने
मधुरमपरंनंदपुण्यांबुपूरात् ॥ ७ ॥ सुकृतिभि
राहृते सरसवेणुनिनादसुधारसलहरीविहारनिरव
ग्रहकर्णपुटे ॥ व्रजवरसुंदरीमुखसरोरुहसार
सिकेमहसिकदानुमज्जतिमदीयमिदंहृदयम् ॥८॥
तृष्णातुरेचेतसिजृंभमाणं मुष्णन्मुहुर्मोहमहांध
कारम् ॥ पुष्णातुनःपुण्यदयैकसिंधोःकृष्णस्यका
रुण्यकटाक्षकेलिः॥ ९ ॥ निखिलनिगममौलि
लालितंपदकमलंपरमस्यतेजसः ॥ व्रजभुविबहु
मन्महेतरांसरसकरीषविशेषभूषितम् ॥ १० ॥
उदारमृदुलस्मितव्यतिकराभिरामाननंमुदा मुहुरु
दीर्णयामुनिमनोंबुजाम्रेडितम् ॥ मदालसवि
लोचनव्रजवधूमुखास्वादितं कदानुकमलेक्षणंक
मपिबालमालोकये॥ ११ ॥ व्रजजनमदयोषि
ल्लोचनोच्छिष्टशेषीकृतमतिचपलाभ्यां लोचना

भ्यामुभाभ्याम् ॥ सकृदपिपरिपातुंतेवयंपारया
मःकुवलयदलनीलंकांतिपूरंकदानु ॥ १२ ॥ घो
षयोषिदनुगीतवैभवं कोमलस्तनितवेणुनिःस्व
नम् ॥ सारभूतमभिरामसंपदांधामतामरसलोच
नंभजे ॥ १३ ॥ लीलयाललितयावलंबितंमूलगे
हमिवमूर्तिसंपदाम् ॥ नीलनीरदविकासविभ्रमं
बालमेववयमाश्रयामहे ॥ १४ ॥ वंदेमुरारेश्चर
णारविंदद्वंद्वंदयादर्शितशैशवस्य ॥ वंदारुवृंदारक
वृंदमौलिमंदारमालाविनिमर्दभीरु ॥१५॥ यस्मि
न्नृत्यतियस्यशेखरभरैःक्रौंचद्विषश्चंद्रकी यस्मिन्
हृष्यतियस्यघोषसुरभिजिघ्रन्वृषोधूर्जटेः ॥ य
स्मिन्सज्जतियस्यविभ्रमगतिंवांछन्हरेः सिंधुर
स्तद्वृंदावनकल्पकद्रुमवनंतंवाकिशोरंभजे॥ १६ ॥
अरुणाधरामृतविशेषितंस्मितं वरुणालयानुगतव
र्णवैभवम् ॥ तरुणारविंददलदीर्घलोचनंकरुणा
लयंकमपिबालमाश्रये ॥१७॥ लावण्यवीचीलल

तांगभूषांभूषापदारोपितपुण्यबर्हाम्॥ कारुण्यधारा
च्छकटाक्षमालांबालां भजेबल्लववंशलक्ष्मीम् ॥
॥ १८॥ मधुरैकरसंवपुर्विभोर्मथुरावीथिचरंभजा
महे ॥ नगरीमृगशावलोचनानांनयनेंदीवरवर्ष
वर्षितम् ॥ १९ ॥ पर्याकुलेननयनांतविजृंभितेन
वक्रेणकोमलदरस्मितविभ्रमेण, ॥ मंद्रेणमंजुल
तरेणचजल्पितेननंदस्यहंततनयोहृदयंधुनोति ॥
॥ २० ॥ कंदर्पकंडूलकटाक्षबंदीरिंदीवराक्षीरभि
लाषमाणान् ॥ मंदस्मिताधारमुखारविन्दान्वन्दा
महेबल्लवधूर्तपादान् ॥ २१ ॥ लीलाटोपकटा
क्षनिर्भरपरिष्वङ्गप्रसंगाधिकप्रीतेरीतिविभंगसंगर
लसद्वेणुप्रणादामृते ॥ राधालोचनलालितस्य
ललितस्मेरेमुरारेर्मुदा माधुर्यैकरसेमुखेंदुकमले
मग्नंमदीयंमनः ॥ २२ ॥ शरणागतवज्रपंजरेशर
णेशार्ङ्गधरास्यवैभवे ॥ कृपयाधृतगोपविग्रहेकिय
दन्यन्मृगयामहेवयम् ॥ २३ ॥ जगत्त्रयैकांतमनो

ज्ञभूमिचेतस्यजस्रंममसन्निधत्ताम्॥ रामासमास्वा
दितसौकुमार्यराधास्तनाभोगरसज्ञमोजः॥ २४ ॥
वयमेतेविश्वसिमःकरुणाकरकीर्तिकिंत्र इत्यग्रे ॥
अपिचविभोतवललितेचपलतरामतिरियंबाल्ये ॥
॥२५॥वत्सपालचरःकोपिवत्सश्रीवत्सलांछनः ॥
उत्सवायकदाभावीत्युत्सुकेममलोचने ॥ २६ ॥
मधुरिमभरितेमनोभिरामे मृदुलतरस्मितमुद्रिता
ननेंदौ ॥ त्रिभुवननयनैकलोभनीयेमहसिवयंव्र
जभाजिलालसाःस्मः ॥ २७ ॥ मुखारविंदेमकरं
दबिंदुनिष्पंदलीलामुरलीनिनादे ॥ व्रजांगनापां
गतरंगभृंगसंग्रामभूमौतवलालसाःस्मः ॥ २८ ॥
आताम्रायतलोचनांशुलहरीलीलासुधाऽऽप्यायितै
र्गीताम्रेडितदिव्यकेलिभरितैःस्फीतंव्रजस्त्रीजनैः ॥
स्वेदांभःकणभूषितेनकिमपिस्मेरेण वमें दुनापा
दांभोजमृदुप्रचारसुलभंपश्यामिहश्यंमहः ॥२९॥
पाणौवेणुःप्रकृतिसुकुमाराकृतौबाल्यलक्ष्मीः पार्श्वे

बालाः प्रणयसरसालोकितापांगलीलाः ॥ मौलौ
बर्हमधुरवदनांभोरुहेमौग्ध्यमुद्रेत्यार्द्राकारं किमपि
कितवं ज्योतिरन्वेषयामः ॥ ३० ॥ आरूढवेणु
तरुणाधरविभ्रमेण माधुर्यशालिवदनांबुजमुद्वहं
ती ॥ आलोक्यतांकिमनयावनदेवतावः कैशोरके
वयसिकांचनकांतियष्टिः ॥ ३१ ॥ अनन्यसाधार
णकांतिकांतमाक्रांतगोपीनयनारविंदम् ॥ पुंसःपु
राणस्यनवंविलासं पुण्येनपूर्णेनाविलोकयिष्ये ॥
॥ ३२ ॥ साष्टांगपातमभिवंद्यसमस्तभावैः सर्वा
न्सुरेंद्रनिकरानिदमेवयाचे ॥ मंदस्मितार्द्रमधुरान
नचंद्रबिंबनंदस्यपुण्यनिचयेममभक्तिरस्तु ॥३३॥
एषुप्रवाहेषुसएवमन्येक्षणोपिगण्यः पुरुषायुषेषु ॥
आस्वाद्यतेयत्रकयापिवृत्त्या नीलस्यबालस्यनिजं
चरित्रम् ॥ ३४ ॥ निसर्गसरसाधरंनिजदयार्द्रदि
व्येक्षणंमनोज्ञमुखपंकजं मधुरसांद्रमंदस्मितम् ॥
रसज्ञहृदयास्पदंरमितबल्लवीलोचनंपुनः पुनरुपा

स्महेभुवनलोभनीयंमहः ॥ ३५ ॥ सकोपिबालः
सरसीरुहाक्षः साचव्रजस्त्रीजनपादधूलिः ॥ मुहुस्त
देतद्युगलं मदीयेमोमुह्यमानेपिमनस्युदेतु ॥३६॥
मयिप्रयाणाभिमुखे चबल्लवीस्तनद्वयीदुर्ललितः
सबालकः ॥ शनैः शनैः श्रावितवेणुनिःस्वनोवि
लासवेषेणपुरः प्रतीयताम् ॥ ३७ ॥ अतिभूमि
मभूमिमेववावचसांवासितबल्लवीस्तनम् ॥ मनसाम
परंरसायनंमधुराद्वैतमुपास्महेमहः ॥ ३८ ॥
जनानांतरेपिजगदेकमंडने कमनीयधाम्निकमलाय
तेक्षणे ॥ व्रजसुंदरीजनविलोचनामृतेचपलानिसं
तुसकलेंद्रियाणिमे ॥ ३९ ॥ मुनिश्रेणीवंद्यंमदभ
रलसद्बल्लववधूस्तनश्रोणीबिंबस्तिमितनयनांभोज
सुभगम् ॥ पुनः श्लाघाभूमिपुलकितगिरांनैग
मगिरां घनश्यामंवंदेकिमपिकमनीयाकृतिमहः
॥ ४० ॥ अनुचुंबतामपिचलेनचेतसामनुजाकृते
र्मधुरिमश्रियं विभोः ॥ अयि देवकृष्णदयि

तेतिजल्पतामपिनोभवेथुरपिनामताहृशः ॥ ४१ ॥
किशोरवेषेणकृशोदरीदृशां विशेषदृश्येनविशाल
लोचनम्॥ यशोदयालब्धयशोनवांबुधिंनिशामये
नीलनिशाकरंकदा ॥४२॥ प्रकृतिरवतुनोविलास
लक्ष्म्याः प्रकृतिजडंप्रणतापराधवीथ्याम् ॥ सुकृ
तिकृतपदंकिशोरभावे सुकृतिमनः प्रणिधानपात्र
मोजः ॥ ४३ ॥ अपहसितसुधामदावलेपैरतिसु
मनोहरमार्द्रमंदहासैः॥ व्रजयुवतिविलोचनावलेह्यं
रमयतुधामरमावरोधनंनः ॥ ४४ ॥ अंकूरितस्मे
रदशाविशेषैरश्रांतहर्षामृतवर्षमक्ष्णाम् ॥ संक्रीड
तां चेतसि गोपकन्याघनस्तनस्वस्त्ययनं महो नः
॥ ४५ ॥ मृगमदपंकसंकरविशेषितवन्यमहागिरि
तटगंडगैरिकघनद्रवविद्रुमितम् ॥ अजितभुजांतरं
भजत हे बत गोपवधूस्तनकलशस्थलीघुसृणमर्द
नकर्दमितम् ॥ ४६ ॥ आमूलपल्लवितलीलमपां
गजालैरासिंचती भुवनमाहतगोपवेषा ॥ बाल्या

कृतिर्मृदुलमुग्धमुखेंदुबिंबा माधुर्यसिद्धिरवतान्म
धुविद्विषो नः ॥ ४७ ॥ विरणन्मणिनूपुरं व्रजच्चर
णांभोजमुपास्स्व शार्ङ्गिणः॥ सरसेसरसिश्रियाश्रि
तं कमलंवाकलहंसनादितम् ॥ ४८ ॥ शरणमशर
णानांशारदांभोजनेत्रं निरवधि मधुरिम्णानीलवेषे
ण रम्यम् ॥ स्मरशरपरतंत्रस्मेरनेत्रांबुजाभिर्व्रजयु
वतिभिरव्याद्ब्रह्मसंवेष्टितं नः ॥ ४९ ॥ सुव्यक्त
कांतिभरसौरभदिव्यगात्रमव्यक्तयौवनहरीतकिशो
रभावम् ॥ गव्यानुपालनविधावनुशिष्टमव्याद
व्याजरम्यमखिलेश्वरवैभवं नः ॥ ५० ॥ अनुगत
ममरीणामंबरालंबिनीनां नयनमधुरिमश्रीनर्मनि
र्माणसीम्नाम् ॥ व्रजयुवतिविलासव्यापृतापांगम
व्यात्त्रिभुवनसुकुमारं देवकैशोरकं नः॥५१॥आपा
दमाचूडमतिप्रसक्तैरापीयमाना यमिनां मनो
भिः ॥ गोपीजनज्ञातरसावतान्नो गोपालभूपालकु

मारमूर्तिः ॥ ९२ ॥ दिष्ट्या वृन्दावनमृगदृशां वि
प्रयोगाकुलानां प्रत्यासन्नं प्रणयचपलापांगवीची
तरंगैः ॥ लक्ष्मीलीलाकुवलयदलश्यामलं धामका
मान्पुष्णीयान्नः पुलक कुलाभोगभूषाविशेषम् ॥
॥ ९३ ॥ जयति गुहशिखींद्रपिच्छमौलिः सुरगिरि
गैरिककल्पितांगरागः ॥ सुरयुवतिविकीर्णसूनव
र्षस्नपितविभूषितकुंतलः कुमारः ॥ ९४ ॥ मधुरमं
दशुचिस्मितमंजुलं वदनपंकजमंगजवेल्लितम् ॥
विजयतां व्रजबालवधूजनस्तनतटीविलुठन्नयनं
विभोः ॥ ९५ ॥ अलसविलसन्मुग्धस्निग्धं स्मितं
व्रजसुंदरीमदनकदनस्विन्नं धन्यं महद्वदनांबुजम् ॥
तरुणमरुणज्योत्स्नाकात्स्न्यैस्मितस्नपिताधरं जय
ति विजयश्रेणीमेणीदृशां मदयन्महः ॥ ९६ ॥
राधाकेलिकटाक्षवीक्षितमहावक्षःस्थलीमंडनाजी
यासुः पुलकांकुरास्त्रिभुवनस्वादीयसस्तेजसः ॥
क्रीडान्तप्रतिसुप्तदुग्धतनयामुग्धावबोधक्षणत्रासा

रूढद्दढोपगूढगहनाः साम्राज्यसांद्रश्रियः ॥५७॥
स्मितस्नुतसुधाधरा मदशिखंडिबर्हांकिताविशा
लनयनांबुजाव्रजविलासिनीवासिताः ॥ मनोज्ञ
मुखपंकजामधुरवेणुनादद्रवा जयंति ममचेतसश्चि
रमुपासितावासनाः ॥ ५८ ॥ जीयादसौशिखि
शिखंडकृतावतंसा सांसिद्धिकीसरसकांतिसुधा
समृद्धिः ॥ यद्बिंदुलेशकणिकापरिमाणभाग्यसौ
भाग्यसीमपदमंचतिपंचबाणः ॥ ५९ ॥ आया
मेन दृशोर्विशालतरयोरक्षय्यमार्द्रस्मितच्छाया
धर्षितशारदेंदुललितं चापल्यमात्रंशिशोः ॥ आया
सानपरान्विधूय रसिकैरास्वाद्यमानं मुहुर्जीया
दुन्मदबल्लवीकुचभराधारंकिशोरंमहः ॥६०॥ स्कं
धावारसदःप्रजाः कतिपयेगोपाः सहायादयः स्कं
धालंबिनिवत्सदाम्निधनदागोपांगनाःस्वांगनाः ॥
शृंगारागिरिगैरिकंशिवशिवश्रीमंतिबर्हाणिच शृंग
ग्राहिकया तथापि तमिमं प्राहुस्त्रिलोकेश्वरम् ६१

श्रीमद्बार्हिशिखंडमंडनजुषे श्यामाभिरामत्विषे ला
वण्यैकरसावसिक्तवपुषे लक्ष्मीसरःप्रावृषे ॥ ली
लाकृष्टरसज्ञधर्ममनसेलोलामृतस्रोतसे के वा न
स्पृहयंतिहंतमहसे गोपीजनप्रेयसे ॥ ६२ ॥ आ
पाटलाधरमधीरविलोलनेत्रमामोदनिर्भरितमद्भुत
कांतिपूरम् ॥ आविस्मितामृतमनुस्मृतिलोभ
नीयमामुद्रितानन्मह्रोमधुरं मुरारेः ॥ ६३ ॥
जागृहि जागृहि चेतश्चिराय चरितार्थताभवतः ॥
अनुभूयतामिदमिदंपुरः स्थितंपूर्णनिर्वाणम् ६४॥
चरणयोररुणं करुणार्द्रयोःकचभरेबहुलंविपुलंदृ
शोः ॥ वपुषिमंजुलमंजनमेचकेवयसिबालमहो
मधुरंमहः ॥ ६५ ॥ मालाबर्हमनोज्ञकुंतलभरांव
न्यप्रसूनोक्षितां शैलेयद्रवक्लृप्तचित्रतिलकांशश्व
न्मनोहारिणीम् ॥ लीलावेणुरवामृतैकरसिकांला
वण्यलक्ष्मीमयीं बालांबालतमालनीलवपुषंवंदेप
रांदेवताम् ॥ ६६ ॥ जिह्वानंजिह्वानंनुजानेनमो

ग्ध्यंदुहानंदुहानंसुधांवेणुनादैः ॥ लिहानंलि
हानंनुदिव्यैरपांगैर्महानंदसर्वस्वमेतन्नमेतम् ॥
॥ ६७ ॥ लसद्बर्हापीडं ललितसुहृशं स्मेरवदनं
भ्रमत्क्रीडापांगं प्रणतजनतानिर्वृतिपदम् ॥ नवां
भोदश्यामंनिजमधुरिमामोदभरितं परं देवंवंदे
परिमिलितकैशोरकरसम् ॥ ६८ ॥ सारस्य
सामग्र्यमिवाननेनमाधुर्यचातुर्यमिवस्मितेन ॥
तारुण्यकारुण्यमिवेक्षणेन चापल्यसाफल्यमिदं
हृशोर्मे ॥ ६९ ॥ यत्रवातत्रवादेवयदिविश्व
सिमस्त्वयि ॥ निर्वाणमपिदुर्वारमर्वाचीनानिकिं
पुनः ॥ ७० ॥ रागांधगोपीजनवंदिताभ्यांयोगी
द्रभृंगेंद्रनिषेविताभ्याम् ॥ आताम्रपंकेरुहविभ्रमा
भ्यांस्वामिन्पदाभ्यामयमंजलिस्ते ॥७१॥ अर्था
नुलापान्व्रजसुन्दरीणामकृत्रिमाणां च सरस्वती
नाम् ॥ आर्द्राशयेनश्रवणांचलेनसंभावयंतंतरुणं
गृणीमः ॥ ७२ ॥ मनसिममसन्निधत्तांमधुरमु

खामंथरापांगा ॥ करकलितललितवंशाकापिकि
शोराकृतिःकृपालहरी ॥ ७३ ॥ रक्षंतुनः शिशि
तपाशुपाल्याबालावृताबर्हिशिखावतंसाः ॥ प्राण
प्रियप्रस्तुतवेणुगीताः शीताहशोः शीतलगोप
कन्याः ॥ ७४ ॥ स्मितस्तबकिताधरंशिशिरवे
णुनादामृतंमुहुस्तरललोचनं मदकटाक्षमालावृत
म् ॥ उरःस्थलविलीनयाकमलयासमालिंगितंमु
वःस्थलमुपागतंभुवनदैवतंपातुनः ॥ ७५ ॥ दधि
मथननिनादैस्त्यक्तनिद्रः प्रभातेनिभृतपदमगारं
बल्लवीनांप्रविष्टः ॥ मुखकमलसमीरैराशुनिर्वा
प्यदीपान्कवलितनवनीतःपातुगोपालबालः ॥
॥ ७६ ॥ नयनांबुजेभजतकामदुघंहृदयांबुजे
किमपिकारुणिकम् ॥ चरणांबुजेमुनिकुलैकधनं
वदनांबुजेव्रजवधूविभवम् ॥ ७७ ॥ निर्वासनंहंत
रसांतराणांनिर्वाणसाम्राज्यमिवावतीर्णम्॥ अव्या
जमाधुर्यमहानिधानमव्याद्व्रजानामधिदैवतं नः ॥

॥ ७८ ॥ गोपीनामभिमतगीतवेषहर्षादापीनस्त-
नभरनिर्भरोपगूढम् ॥ केलीनामवतुरसैरुपास्यमा
नंकालिंदीपुलिनचरंपरंमहोनः ॥ ७९ ॥ खेलतां
मनसि खेचरांगनामाननीयमृदुवेणुनिःस्वनैः ॥
काननेकिमपि नः कृतास्पदं कालमेघकलहोद्वहं
महः ॥८०॥ कालिंदीपुलिनेतमालनिबिडच्छाये
पुरःसंचरत्तोये तोयजपत्रपात्रनिहितंदध्यन्नमश्ना
तियः ॥ वामेपाणितले निधाय मधुरंवेणुंविषाणं
कटिप्रांतेगाश्चविलोकयन्प्रतिकलं तंबालमालोक
ये ॥ ८१ ॥ एणीशावविलोचनाभिरलसश्रेणीभ
रप्रौढिभिर्वेणीभूतरसक्रमाभिरभितः श्रेणीकृता
भिर्वृतः ॥ पाणीनामविनोदयन्रतिपतेस्तूणीश-
यैःसायकैर्वाणीनामपदं परं व्रजजनक्षोणीपतिःपा
तुनः ॥ ८२ ॥ यद्गोपीवदनेंदुमंडनमभूत्कस्तूरि-
कापत्रकंयल्लक्ष्मीकुचशातकुंभकलशव्याकोचमिं
दीवरम् ॥ यन्निर्वाणनिधानसाधनविधौसिद्धांज

नंयोगिनां तन्नः श्यामलमाविरस्तुहृदयेकृष्णाभि
धानंमहः ॥ ८३ ॥ फुल्लेंदीवरकांतिमिंदुवदनंब
र्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरंपीतांबरं
सुन्दरम् ॥ गोपीनां नयनोत्पलार्चिततनुंगोगोपसं
घावृतं गोविंदं कलवेणुनादनिरतं दिव्यांगभूषंभजे
॥ ८४ ॥ यन्नाभीसरसीरुहांतरपुटेभृंगायमानोवि
धिर्यद्वक्षः कमलाविलाससदनं यच्चक्षुषीचेंद्विनौ ॥
यत्पादाब्जविनिःसृतासुरनदीशंभोः शिरोभूषणं
यन्नामस्मरणंधुनोतिदुरितं पायात्सनः केशवः
॥ ८५ ॥ रक्षतुत्वामसितजलजैरंजलिःपादमूले
मीनानाभीसरसिहृदयेमारबाणासुरारेः ॥ हाराः
कंठेहरिमणिमयावक्त्रपद्मेद्विरेफाः पिच्छाचूडाश्चि
कुरनिचयेघोषयोषित्कटाक्षाः ॥८६ ॥ प्रातः स्म
रामिदधिघोषविधूतनिद्रं निद्रावसानरमणीयमुखा
रविंदम् ॥ हृद्यानवद्यवपुषंनयनाभिराममुन्निद्रपद्म
नयनंनवनीतचोरम् ॥ ८७ ॥ फुल्लहल्लकवतंसको

ह्लसद्वल्लमागमगवीगवेषितम् ॥ वल्लवीचिकुरवासि
तांगुलीपल्लवंकमपिबल्लवंभजे ॥ ८८ ॥ स्तेयं
हरेर्हरतियन्नवनीतचौर्यं जारत्वमस्यगुरुतल्पकृता
पराधम् ॥ हत्यांदशाननहतिर्मधुपानदोषंयत्पूत
नास्तनपयः सपुनातु कृष्णः ॥ ८९ ॥ मारमाव
समदीयमानसे माधवैकनिलयेयदृच्छया ॥ हे
रमारमण वार्यतामसौ कःसहेत निजवेश्मलंघनम्
॥ ९० ॥ आकुंचितंजानुकरंचवामंन्यस्यक्षितौ
दक्षिणहस्तपद्म ॥ आलोकयंतंनवनीतखंडबालं
भजेकृष्णमुपानतांगम् ॥ ९१ ॥ मंदारमूलेमदना
भिरामंबिंबाधरापूरितवेणुनादम् ॥ गोगोपगोपीज
नमध्यसंस्थंगोपंभजेगोकुलपूर्णचंद्रम् ॥ ९२ ॥
जानुभ्यामभिधावंतबाहुभ्यामतिसुंदरम् ॥ सुकुंड
लालकंबालंगोपालंचिंतयेद्बुधः ॥ ९३ ॥ विहाय
कोदंडशरान्मुहूर्तंगृहाणपाणौमणिचारुवेणुम् ॥
मायूरबर्हंचनिजोत्तमांगे सीतापते त्वांप्रणमामिप

श्चात् ॥ ९४ ॥ अयंक्षीरांभोधेःपतिरितिगवांपा
लकइति श्रितोऽस्माभिःक्षीरोपनयनधियागोपत
नयः ॥ अनेनप्रत्यूहोव्यरचिसततंयेनजननीस्त
नादप्यस्माकंसकृदपिपयोदुर्लभमभूत् ॥ ९५ ॥
हस्तमाक्षिप्ययातोसिबलात्कृष्णकिमद्भुतम् ॥ हृ
दयाद्यदिनिर्यासिपौरुषंगणयामिते ॥ ९६ ॥ या
प्रीतिर्विदुरार्पितेमुररिपो कुंत्यर्पितेयादृशीयागोव
र्धनमूर्ध्नियाचपृथुकेस्तन्येयशोदार्पिते ॥ भारद्वा
जसमर्पितेशबरिकादत्तेऽधरेयोषितांया प्रीतिर्मुनि
पत्निभक्तिरचितेह्यत्रापितांतांकुरु ॥ ९७ ॥ तम
सिरविरिवोद्यन्मज्जतामंबुराशौ प्लवइवतृषितानां
स्वादुवर्षीवमेघः ॥ निधिरिवविधनानांदीर्घतीव्रा
मयानांभिषगिवकुशलंनोदातुमायातुशौरिः ॥
॥ ९८ ॥ कोदंडंमसृणंसुगंधिविशिखंचक्राब्जपा
शांकुशंहैमींवेणुलतांकरैश्चदधतंसिंदूरपुंजारुणम् ॥
कन्दर्पाधिकसुन्दरं स्मितमुखंगोपांगनावेष्टितंगो

पालंमदनाधिपंतमभजंत्रैलोक्यरक्षामणिम्॥९९॥
सायंकाले वनांते कुसुमितसमये सैकते चं
द्रिकायांत्रैलोक्याकर्षणांगं सुरनरगणिकामोहना
पांगमूर्तिम् ॥ सेव्यंशृंगारभावैर्नवरसभरितैर्गोपक
न्यासहस्रैर्वंद्देहं रासकेलीरतमतिसुभगं वश्यगो
पालकृष्णम् ॥१००॥ कदंबमूलेक्रीडंतं वृन्दाव
ननिषेवितम् ॥ पद्मोपरिस्थितंवन्देवेणुंगायंतम
च्युतम् ॥ १०१ ॥ बालंनीलांबुदाभंनवमणिवि
लसत्किंकिणीजालबद्धश्रोणीजंघांतयुग्मंविपुलरु
रुनखप्रोल्लसत्कंठभूषम् ॥ फुल्लांभोजाभवक्रंहत
शकटपतत्पूतनाद्यंप्रसन्नं गोविंदंवंदितेंद्राद्यमरवर
मजंपूजयेद्वासरादौ ॥ २ ॥ वंद्यंदेवैर्मुकुंदंविकसि
तकुरुविंदाभमिंदीवराक्षं गोपीगोवृंदवीतंजितरि
पुनिवहं कुंदमंदारहासम् ॥ नीलग्रीवाग्र्य
पिच्छग्रथनसुविलसत्कुंतलं भानुमंतंदेवंपीतांबरा
ढ्यंयजयजदिनशोमध्यमाह्ने रमायै ॥ ३ ॥

चक्रान्तध्वस्तवैरिव्रजमजितमपास्तावनीभारमाद्यै
रावीतं नारदाद्यैर्मुनिभिरभिनुतं तत्त्वनिर्णीतिहे
तोः॥सायाह्नेनिर्मलांगं निरुपमममचिरं चिंतयेन्नी
लभासंमंत्री विश्वोदयस्थित्यपहरणपदंमुक्तिदंवा
सुदेवम् ॥ १०४ ॥अंगुल्याकः कपाटंप्रहरतिकुटि
लेमाधवः किंवसंतोनोचक्रीकिंकुलालोनहिधरणि
धरःकिंद्विजिह्वःफणींद्रः ॥नाहंघोराहिमर्दीकिमसि
खगपतिर्नोहरिःकिंकपींद्र इत्येवं गोपकन्याप्रतिव
चनजितःपातुवश्चक्रपाणिः ॥१०५ ॥ राधामोहन
मंदिरादुपगतश्चंद्रावलीमूचिवान् राधे क्षेममये
ऽस्ति तस्य वचनं श्रुत्वाहचंद्रावली॥कंसक्षेममये
विमुग्धहृदयेकंसः क्वदृष्टस्त्वयाराधाक्वेतिविलज्जि
तोनतमुखःस्मेरोहरिःपातुवः ॥१०६॥ कोदंडमै
क्षवमखंडमिषुंचपौष्पं चक्राब्जपाशसृणिकांचनवं
शनालम् ॥ बिभ्राणमष्टविधबाहुभिरर्कवर्णंध्याये
द्धरिंमदनगोपविलासवेषम् ॥ १०७ ॥ जयतुज

यतुदेवोदेवकीनंदनोयंजयतुजयतु कृष्णोवृष्णिवंशप्रदीपः ॥ जयतुजयतुमेघश्यामलःकोमलांगो जयतुजयतुपृथ्वीभारहारोमुकुंदः ॥ १०८ ॥ कृष्णानुस्मरणादेवपापसंघातपंजरः ॥ शतधाभेदमायातिगिरिर्वज्रहतोयथा ॥ १०९ ॥ इति श्रीलीलाशुकविरचिते श्रीकृष्णकर्णामृते तृतीयं शतकं समाप्तम्॥श्रीमद्राधाकृष्णचरणारविंदार्पणमस्तु॥

अथ भट्टश्रीमाधवकविप्रणीतं

दानलीलाकाव्यम् ।

अस्ति स्वस्तिकरी समस्तजगतां निर्वाणगर्वापहा क्षोणीमण्डलमध्यभूषणमणिः काचित्पुरी माधवी॥रम्या कृष्णतरङ्गिणीसहचरी कर्मद्रुमोन्मूलिनी सत्यानन्दचिदात्मनोऽनवरतस्वेच्छाविहारस्थली ॥ १ ॥ स्निग्धच्छायतरुप्रसूनविलसन्मा

धुर्यंलोभभ्रमत्कालिंदीपुलिनोपवर्तिपवनप्रालेयि
तप्राङ्गणम् ॥ ब्रह्मेन्द्रादिसुरेन्द्रमृग्यमहिमप्रेमैक
लभ्यं परं पूर्णब्रह्मरहोविहारभवनं तत्रास्ति वृन्दा
वनम् ॥२॥ नित्यानेकफलप्रवालसुमनःशीतोष्ण
वर्षादिभिर्यस्मिन्कालगुणैस्त्रिकालविदुषां याता
मतिर्मुग्धताम्॥ श्रीराधामुखकर्णभूषणलसन्माणि
क्यचन्द्रांशुमन्नित्योद्यत्किरणैः क एष समयो
निर्णेतुमित्यञ्जसा ॥ ३ ॥ ये राधारतिकान्तकोम
ललसत्पादारविन्दद्वयप्रस्यन्दन्मकरन्दपानमुदि
तस्वात्मेन्द्रियेन्दिन्दिराः ॥ धर्मादित्रितयं चतु
र्विधमपि श्रेयस्तृणीकुर्वते तेषामेव परं मनः सुकृ
तिनां यस्मिन्नरीनृत्यते ॥ ४ ॥ क्रीडाकौतुकमी
क्षितु भगवतः सर्वे सुनन्दादयो ब्रह्मामर्त्यमुनी
न्द्रसिद्धविबुधा नन्दव्रजानन्दिनः ॥ भूत्वा चन्द्र
किकीरकोककलरुत्कादम्बमुख्यद्विजा यस्मिन्कृ
ष्णमृगादयो मृगवरा निर्वैरमध्यासते ॥ ५ ॥ तत्र

श्रीरमणः कलिन्दतनयातीरोल्लसन्मालतीवल्लीपल्लवमल्लिकावलयितद्योतन्निकुञ्जालिषु ॥ वंशीवादविनोदनोदितमनोजन्मोपनीतव्रजक्षामाङ्गीमिषवेदशेखरगिरां वृन्दैरलं क्रीडति॥६॥तल्लीलेक्षणविस्मृतक्षणगणैरेणाङ्कयानादिव ग्रश्यद्भिर्भगणैरनङ्गरभसादेणीदृगानन्दिनः ॥ त्रुटच्चन्मौक्तिकदामकाञ्चनरणत्काञ्चीक्वणन्नूपुरैः स्रंसत्कुन्तलमल्लिकादिसुमनःसंघैर्बभौ केलिभूः ॥७॥ इत्थं मञ्जुतरस्थलीषु नलिनीगेहेषु कल्लोलिनीकूलान्तःपुलिनेषु च प्रमदयन्सोऽरीरमद्रात्रिषु ॥ नानाकामकलाविनीतवनिताभावैरनेकैर्मुहुर्मुष्णन्तीर्हृदयंगमैरपि मनःकंदर्पदर्पापहः ॥ ८ ॥ आभीरार्भकमण्डलैः परिवृतो वृन्दं गवां चारयन्वृन्दारण्यपुरंदरोऽरुणभुवस्तीरे मनोहारिणि ॥ गुञ्जाबर्हदलप्रसूनविहितप्रत्यङ्गभूषोत्सवो गायन्वेणुरवैर्दिवापि कृतिनः संलालयन्क्रीडति ॥ ९ ॥ एकस्मिन्दि

वसेऽव्रजद्व्रजपतिर्गोपात्मजैरन्वितः प्रातर्नैव कृता
शनो मुरलिकामापूर्य रम्यं वनम् ॥ तत्रस्मैत्यथव
नस्थलीषु विहरन्प्रत्यग्रनानाविधस्वेच्छाकल्पि
तकेलिभिर्विलसति प्रेमैकलभ्यो हरिः ॥ १० ॥
ऊचुर्गोकुलपालकाः क्वचिदमुं कृष्णं क्षुधासंप्लुताः
किंचिच्चिन्तयतत्र तान्व्रजपतिः प्रत्यब्रवीत्पश्य
त ॥ विक्रेतुंव्रजसुन्दरीर्दधिपयो यान्तीः पुरं चेत्त
दायाचध्वं पुरतः करं यदि नतादास्यन्त्यथोलुण्ठ
त॥११॥श्रुत्वैवं वचनानि गोकुलपतेरारुह्य केचि
द्द्रुमान्दूरादेव विलोक्य गोकुलवतीर्मन्द्रक्वणन्नूपु
राः ॥ धम्मिल्लग्रथितप्रसूननिकरैर्वीथीरलंकुर्वती
र्गोस्तन्यामृतपूर्णभाजनलसन्मौलीर्मुदावातरन् ॥
॥१२॥वक्रोक्तिप्रखराः स्वभावचपला नन्दात्मजं
संश्रितास्तस्थुर्गोकुलयोषितां तत इतः संवृत्य के
चित्पुरः ॥ पन्थानं प्रतिरुध्य कण्टकिलताकीर्णं
द्रुमैः संकुलं बर्होत्तंसवनप्रसूनसुभगा वेत्रैकहस्ता

स्ततः ॥ १३ ॥ तावन्मुग्धवधूजनः कलरवं गा
यन्यशः श्रीपतेः काञ्चीनादविभिन्ननूपुररणत्का
रैर्मुनीनामपि ॥ अन्तःपञ्चशरानुगं विरचयन्नन्यो
न्यहासोक्तिभिर्हस्तान्दोलनतालिकाभिरभितः खे
लञ्शनैरभ्यगात् ॥ १४ ॥ आयान्तीर्व्रजसुन्दरीः
कलपदंस्वच्छन्दमुद्वीक्ष्य ता गायन्तीः प्रतिवीथि
गोपपृथुका वेत्रोल्लसत्पाणयः॥वल्गन्तश्च मुहुः स
हासशपथं संत्रासयन्तश्च ता धावन्तश्च ततस्ततो
रुरुधिरे प्रत्येकमत्यद्भुताः ॥ १५॥ काश्चित्क्वापि
निलिलियिरे तत इतो निर्गत्य काश्चिद्ययुः
काश्चित्संभ्रमवीक्षणाश्च चकिताः काश्चित्पुनः
प्रत्ययुः ॥ सर्वास्ताः प्रतिषिध्य काञ्चनपुनस्ता
नब्रुवन्निर्भया रेरे भूत निरुन्ध केन युवतीः केकस्य
वान्तर्व्रजे ॥ १६ ॥ किं प्रश्नैर्बहुभिर्वयं विधि
कराः सूनोर्व्रजाधीशितुर्दानीनस्य विहारिणो वन
भुवि स्वैरं रसोनामुना ॥ आदातुं दधिदुग्धयोः

करमितः सर्वे वयं प्रेषितास्तद्गृह्णीत सुखेनगोपक
नितादत्त्वास्वकीयान्पथः ॥ १७ ॥ तच्छ्रुत्वा परि
हास्य ता अपि मिथः संवीक्ष्य तानूचिरे निर्य
क्कुञ्चितकंधरैः करतलैर्दत्त्वासकृत्तालिकाः ॥ एतै
रेवसुखैरभीप्सथ पयः पातुं दधि स्वादुमत्तत्प्रक्षा
ल्यनिजान्यमूनिनचिरादागच्छतागच्छत ॥१८॥
काचिद्गोपनितम्बिनी निजकरेणोद्धृत्य किंचिद्दधि
स्वीयं पश्यत जक्षतेति वचनं व्याहृत्य वक्रान्ति
कम् ॥ गत्वा गण्डतले विलिप्य झटिति प्रत्या
गमत्स्वान्तरं दृष्ट्वा तज्जहसुर्भृशं करतलैरुच्चैर्दु
स्तालिकाः ॥ १९ ॥ काचित्पाणितलेन कंचिद
परं हत्वाकपोलस्थले निर्भर्त्स्यैष करं ग्रहीष्यति
मुखं शक्तिं च पश्यन्त्वति ॥ जल्पन्ती पुरतः
कराङ्गुलिपतिंसंदर्शयित्वा मुहुः सर्वाभिः सम
मन्यतः प्रचलितामार्गं परित्यज्य तम् ॥ २० ॥
गच्छंस्तीरपथेनवीक्ष्य जहसुः संकूर्द्य गत्वा पुरो

याता यूयमिति प्रजल्प्य शिरसः पात्राणि चापाहरन् ॥ मूढास्तिष्ठत दूरतः किमुत नो जानीथ दासीस्तदेत्यूचुस्तान्वृषभानुगोपजनुषः किं वा न तां पश्यत ॥ २१ ॥ कण्ठश्रीमणिरत्नमौक्तिकसरैर्नानावतंसैरपि प्रत्यङ्कं वलयैः सुवर्णलशुनैरत्नाङ्गुलीयैरपि ॥ हारैः काञ्चनचन्द्रकार्धविधुभिः सीमन्तसंदर्भितभ्राजच्चम्पककुड्मलैश्च तिलकैरुद्दीपयन्ती स्मरम ॥ २२ ॥ नानारत्ननिबद्धकाञ्चनलसत्पर्णच्छदैर्मञ्जुलैर्मुक्ताभिः परितो लसत्तनुतरं चित्राञ्चलं बिभ्रती ॥ अन्तःकृत्रिमपुत्रिकाविरचनैर्हैमैश्च रौप्यै रसै राजन्नीलदुकूलमुत्कलयती नीवीं करेण क्वचित् ॥२३॥ खेलत्खञ्जनलोचना नसि लसन्मुक्ताग्ररत्नान्तरभ्राजिष्णुप्रसरत्सुवर्णकुसुमा बन्धूकरम्याधरा॥संसर्पद्दशनांशुभिर्दश दिशोऽप्युद्भासयन्ती मिथः क्रीडन्तीललितादिभिः प्रियसखीवृन्दैः समंसस्मिता ॥ २४ ॥ केशग्रन्थिमुरंगदोर

क्वणित्सौवर्णपथ्यामणिद्योतन्मौक्तिकगुच्छरेखि
तरातद्योतन्नितम्बाम्बरा ॥ अन्तः सेयमथाविरास
शनकैर्मञ्जीरमञ्जुस्वनै राधामाधवमाकुलं कलय
तीनेत्राञ्चलान्दोलनैः ॥ २५ ॥

(कालापकम्)

मौलौ चन्द्रकशेखरं श्रवणयोरर्कप्रभे कुण्डले
मुक्ता नस्यलिके ललामतिलकं कण्ठे मणिं कौ
स्तुभम् ॥ पाण्योः कङ्कणमङ्गदं च हृदये हारं
तथा मौक्तिकं कौशेयं कनकप्रभं कटितटे बिभ्र
त्क्वणत्काञ्चिकम् ॥ २६ ॥ दृष्ट्वा तां निजव
ल्लभामतिरसादागत्य धृत्वाञ्चलं नीलेन्दी
वरकान्तकोमलतनुः किंचिल्लसल्लोचनः ॥ शिञ्ज
न्नूपुरमञ्जुलैर्निजपदैरुल्लासयन्भूतलं सर्वाङ्गेवन
मालया विलसितः सस्मेरमूचे हरिः ॥ २७ ॥
मुग्धे त्वं बहुभिर्दिनैरसि मया प्राप्ताद्य चौर्येण य
न्नित्यं यासि सहालिभिर्दधिपयो विक्रीयविक्रीय

वै ॥ विज्ञेयं कमलाक्षि तत्परमतो मत्तेभकुम्भस्त
नि त्वां मुञ्चामि तदैव सुंदरि यदा सर्वस्य दद्याः
करम् ॥ २८ ॥ इत्याकर्ण्य कृशोदरी कलपदं म
न्दाक्षमन्दाक्षरं प्रत्यूचे वचनानि सस्मितमुखी
त्वं तस्करो वा वयम् ॥ तज्जानासि न किं त्वमेव
जननीबद्धो यदोलूखले त्वां किंचिन्नवनीतचोरम
जहात्तत्किं त्वया विस्मृतम् ॥२९॥ रेरे चञ्चलमु
ञ्चमेऽञ्चलमलं किं लोचने नर्तयेः सख्यः पश्यत
धाष्टर्चमस्य महितां यन्नात्मनो रक्षति॥इत्युक्त्वा
करतोऽपहृत्य:वसनं वंशीं च गत्वा द्रुतं पश्चादेहि
गृहाण चेत्यभिदधे साङ्गुष्ठदर्शस्मितम् ॥३०॥
किं कुर्मः सखि नन्दगोकुलपतिर्ज्ञात्याभिजा
त्यादिभिर्ज्यायांस्तत्तनयस्ततोऽप्यतितरां मान्यो
ह्ययं माहशाम् ॥ इत्यालोच्य मयानपाश्रितमतेरा
गोऽस्य संस्थीयते नो चेदद्य तथा क्रियेत पुनर
प्येवं न कुर्याद्यथा ॥ ३१ ॥ तत्तस्याः प्रसमीक्ष्य

हेलनममी लज्जानमत्कंधरं गोविन्दं स्मितरोषसु
न्दरमुखं तिर्यक्चलल्लोचनम् ॥ दृष्ट्वा चोद्धतमन्य
वः कृतधियस्तन्नोदिताल्लुण्ठितुं धावन्तः परितः
पुरंध्रिनिचयं संतर्जयांचक्रिरे ॥ ३२ ॥ जक्षुः के
चन नव्यगव्यमितरेऽमत्राणि जह्नुस्ततः श्रीदा
माद्यनुगाव्रजेशजनुषो व्यातेनिरे बल्लवीः ॥ इत्थं
संभ्रमिता बृहत्कलकलैरूचेऽथ काचिद्वधूरायाताः
किमु लुण्ठितुं करमुतादातुं समादत्त तत् ॥३३॥
वाचो नःशृणुतान्यतोऽस्त्यपि करो गव्यस्य जातु
क्वचिद्रीतिः कांचन कल्पिता नवनवा युष्माभिर
त्रैव वा ॥ कस्तूरीघनसारकं मलयजं चैलालवङ्गा
दयो विद्यन्तेऽत्रकरंग्रहीष्यति पुनःकस्यात्र त
त्कथ्यताम् ॥ ३४ ॥ अस्त्येतद्विपिनं वयं युव
तयो द्रव्यं च गव्यं परं कंसश्चोग्रनृपोऽनयं
कुरुथ यत्तेनैव युक्तं ततः ॥ किंचान्यत्पथिकाः
क्वचित्कलपदं गायन्ति लोलेक्षणा वक्षोजेषु च

बिभ्रति क्वचिदहो गत्वाञ्चलं योषिताम् ॥ ३५ ॥
श्रुत्वा तद्वचनानि गोकुलपतिः प्रत्यब्रवीत्सस्मि
तं दत्त्वा यात करं मदीयमखिलं गत्वा नृपस्या
ग्रतः ॥ब्रूताहं न ततो बिभेमि दलिकाचूर्पस्य चै
षास्ति वस्तस्यापि त्वरितं प्रयात कुरुत स्वंस्वं
मनोभावितम् ॥ ३६ ॥ ऊचेऽन्याथ तदा त्वमेव
नृपतिः साधूच्यतां तस्करः कस्यायं च कियान्व्र
जेश वनिताहल्लोचनानन्दन॥कर्णाभ्यां परिपीय
तत्कलगिरः संजातरोमोद्गमा तस्यापाङ्गतरङ्गभ
ङ्गिजनितानंगातुराङ्गी वधूः ॥ ३७ ॥ मौलौ
गुम्फितमल्लिकासुमनसां नेत्राञ्जनानां तथा कर्ण
स्वर्णजपर्णयोश्च मधुनो बिम्बाधरस्यन्दिनः॥ हा
रस्यापि च मौक्तिकस्य लुठतः कण्ठे कटिप्रक्कण
त्किंकिण्याश्च करं प्रयच्छत रणन्मञ्जीरयोः को
टिशः ॥३८ ॥ तद्भावं मनसावगाह्य मदनेनाविद्ध
चित्ता भृशं स्मेरास्या न च भाषितुं समशकँछ

ज्ञानमत्कंधराः ॥ ईषत्कुञ्चितलोचनाञ्चलशरैर्भ्र
न्त्यो मुहुर्माधवं धृत्वा धैर्यमथोचिरे कुचपटैरावृ
त्य किंचिन्मुखम् ॥ ३९ ॥ श्याम श्यामतमाल
मञ्जुलतनो दास्यस्तवाज्ञापयस्वच्छन्दं तदशान
गोरसमिमं साकं स्वकैः किंकरैः ॥ अन्यच्चापि
यदीप्सितं तव हि तद्भक्तुं न शक्ता वयं गन्तुं चा
पि भवत्पदाम्बुजरजः कांक्षामहे केवलम् ॥४०॥
नीलेन्दीवरलोचनः स भगवानाकर्ण्य तत्सा
दरं ताभिर्दत्तमथाजजक्ष सखिभिः साकं दधि
स्वादुमत्॥एतस्या मदमत्तवारणगतेः स्निग्धं निर
म्बूज्ज्वलं मृष्टं नैव तवेति संपरिहसन्नानाविनोदै
र्विभुः ॥ ४१ ॥ भुक्त्वा तद्दधि मञ्जुकुञ्जसदनं
गत्वा रहःकेलिभिः कृत्वा तल्पमनल्पकल्पकुसुमै
र्हत्वा सुधामाधुरीम् ॥ पीत्वा च स्वरतोऽप्यरीरम
दलं धृत्वा हृदा राधिकां श्रित्वा मन्मथकोटिजित्व
रवपुर्हत्वा नितम्बाम्बरम्॥४२॥रसावेशादेपा धृत

सुभगवेषा वरतनुर्वरं वारंवारं विततनयना
वधूः ॥ निरीक्ष्य मक्षुभ्यन्मदनकदनक्लान्त
नरन्तु गन्तुं वा गृहमलमभूद्विस्मृतगतिः
इत्थं तन्महदद्भुतं व्रजभुवां भाग्योदयं वीक्ष्य तत्र
ह्मेन्द्रप्रमुखाः सुराः सुमनसां वृन्दैर्मुदावाकिरन् ॥
एतैः किं चरितं तपः श्रुतिशिरःसंगीततत्त्वेन यत्र
स्वच्छन्दं विहरन्ति जन्मसफलं कुर्वन्ति चेत्य
स्तुवन् ॥ ४४ ॥ धन्येयं धरणी ततोऽपि मधुरा
तत्रापि वृंदावनं तत्रापि व्रजवासिनो युवतयस्त
त्रापि गोपांगनाः ॥ तत्राचिन्त्यगुणैकधामपरमा
नन्दात्मिका राधिका लावण्याम्बुनिधिस्त्रिलोकर
मणीचूडामणिः काचन ॥ ४५ ॥ सौभाग्यं भग
वत्प्रियाऽपि नियतं वक्षःस्थलस्थायिनी मुक्ति
श्चापि पदारविन्दमधुनः सौगन्ध्यमाकांक्षति ॥
यस्याश्चोपनिषद्रहस्यमपि तद्ब्रह्माद्वयं केवलं
विज्ञानात्मकृपावलोकनमतस्तां वर्णितुं कः